
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

पं.द. ११

१२२

काव्यप्रकाश

(1)

का०
१

श्रीगणेशायनमः।ग्रंथारंभेविघ्नविघातायसमुचितेष्टदेवतांग्रंथकृत्परामृशति॥नियतिकृतनियमरहितांह्लादैकमयीम
नन्यपरतंत्रां।नवरसरुचिरांनिर्मितिमादधतीभारतीकवेर्जयति॥नियतिशक्त्यानियतस्वरूपासुखदुःखमोहस्वभावा
परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतंत्राषड्रसानचहृद्यैवतैर्ब्रह्मणोनिर्मितिर्निर्माणं॥एतद्विलक्षणा
तुकविवाङ्निर्मितिरतएवजयति।जयत्यर्थे[illegible]ननमस्कारआक्षिप्यतइतितांप्रणतोस्मीतिलभ्यते॥इहाभिधेयंसप्र
योजनमित्याह॥काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतये।सद्यःपरनिर्वृतयेकांतासंमिततयोपदेश
युजे॥कालिदासादीनामिवयशसः।श्रीहर्षादेर्धावकादीनामिवधनं।राजादिगतोचिताचारपरिज्ञानं।आ
दित्यादेर्मयूरादीनामिवानर्थनिवारणंसकलप्रयोजनमौलिभूतंसमनंतरमेवरसास्वादनसमुद्भूतंविगलि
तवेद्यांतरमानंदंप्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यःसुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च।श
ब्दार्थयोर्गुणभावेनरसांगभूतव्यापारप्रवणतयाविलक्षणंयत्काव्यंलोकोत्तरवर्णनानिपुणकविकर्मतत्कांते
वसरसतापादनेनाभिमुखीकृत्यरामादिवद्वर्तितव्यंनरावणादिवदित्युपदेशंचयथायोगंकवेःसहृदयस्यचक

वि

पु०
७०

उ
१

रोतीतिसर्वथात्रयत्नतीयं॥एवमस्यप्रयोजनमुक्त्वाकारणमाह॥शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्।का
व्यज्ञशिक्षयाभ्यासइतिहेतुस्तदुद्भवे॥शक्तिःकवित्वबीजरूपःसंस्कारविशेषःयांविनाकाव्यंनप्रसरेत्।प्रसृतंवोपह
नीयंस्यात्॥लोकस्यस्थावरजंगमात्मकलोकवृत्तस्य।शास्त्राणांछंदोव्याकरणाभिनकोशकलाचतुर्वर्गगजतु
रगखङ्गादिलक्षणग्रंथानांकाव्यानांचमहाकविसंबंधिनांआदिशब्दादितिहासानांचविमर्शनाद्व्युत्पत्तिः।का
व्यंकर्तुंविचारयितुंचयेजानंतितदुपदेशेनकरणेयोजनेचपौनःपुन्येनप्रवृत्तिरितित्रयःसमुदिताः।नतुव्यस्ता
स्तस्यकाव्यस्योद्भवेनिर्माणेसमुल्लासेचहेतुर्नतुहेतवः॥एवमस्यकारणमुक्त्वास्वरूपमाह।तददोषौशब्दार्थौ
सगुणावनलंकृतीपुनःक्वापि।दोषगुणालंकारावक्ष्यंतेक्वापीत्यनेनैतदाह॥यत्सर्वत्रसालंकारौक्वचित्तुस्फु
टालंकारविरहेपिनकाव्यत्वहानिः।यथा।यःकौमारहरःसएवहिवरस्ताएवचैत्रक्षपास्तेचोन्मीलितमाल
तीसुरभयःप्रौढाःकदंबानिलाः।साचैवास्मितथापितत्रसुरतव्यापारलीलाविधौरेवारोधसिवेतसीतरुतले
चेतःसमुत्कंठते।अत्रस्फुटोनकश्चिदलंकारःरसस्यहिप्राधान्यान्नालंकारता॥तद्भेदान्क्रमेणाह॥इ

3

दमुत्तममतिशयिनिव्यंग्येवाच्यात्ध्वनिर्बुधैकथितः॥इदमितिकाव्यंवुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यं
जकस्यशब्दस्यध्वनिरितिव्यवहारःकृतस्ततस्तन्मतानुसारिभिरन्यैरपिन्यग्भावितवाच्यव्यंग्यव्यंजनक्षमस्यशब्दा
र्थयुगलस्य।यथा।निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनंजनेपुलकितातन्वीतवेयंतनुःमि
थ्यावादिनिदूतिबांधवजनस्याज्ञातपीडागमावापींस्नातुमितोगतासिनपुनस्तस्याधमस्यांतिकं॥अत्रतदं
तिकमेवरंतुंगतासीतिप्राधान्येनाधमपदेनव्यज्यते॥अतादृशिगुणीभूतव्यंग्यंव्यंग्येतुमध्यमं॥अतादृ
शिवाच्यादनतिशयिनि॥यथा।ग्रामतरुणंतरुण्यानववंजुलमंजरीसनाथकरं।पश्यंत्याभवतिमुहुर्नितरांम
लिनामुखछाया।अत्रवंजुललतागृहेदत्तसंकेतानागतेतिव्यंग्यंगुणीभूतं।तदपेक्षयावाच्यस्यैवचमत्कार
कारित्वात्॥शब्दचित्रंवाच्यचित्रमव्यंग्यंत्ववरंस्मृतं।चित्रमितिगुणालंकारयुक्तं।अव्यंग्यमितिस्फुटप्रती
यमानार्थरहितमवरमधमं।यथा।स्वछंदोछलदछकछकुहरछातेतरांबुछटामूर्छन्मोहमहर्षिहर्षविहित
स्नानान्हिकान्हायवः।भिंद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदामंदाकि[illegible]नी २

मंदत्तां। विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य यदृच्छयापि यं। ससंभ्रमेंद्रद्रुतपातितार्गला निमिलिताक्षीव भिया
मरावती॥ इति श्रीकाव्यप्रकाशे काव्यस्य प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथमोल्लासः॥ ॥
क्रमेण शब्दार्थयोः स्वरूपमाह। स्याद्वाचको लाक्षणिकः शब्दोत्र व्यंजकस्त्रिधा॥ अत्रेति काव्ये। एषां स्वरूपं
वक्ष्यते। वाच्यादयस्तदर्थाः स्युर्वाच्यलक्ष्यव्यंग्याः तात्पर्यार्थोपि केषुचित्। आकांक्षासंनिधियोग्यतावं
शाद्वक्ष्यमाणस्वरूपाणां पदार्थानां परस्परसमन्वये तात्पर्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः समुल्लसती
त्यभिहितान्वयवादिनां मतं। वाच्य एव वाक्यार्थ इति त्वन्विताभिधानवादिनः। सर्वेषां प्रायशोर्थानां व्यं
जकत्वमपीष्यते। तत्र वाच्यस्य यथा। माए घरोवअरणं अज्ज खु णत्थि त्ति साहिअं तुमए। ता भण किं करणि
ज्जं एमेअ ण वासरो ठाइ। अत्र स्वैरविहारार्थिनीति विज्ञायते। लक्ष्यस्य यथा। साहेंती सहि सुहअं खणे ख
णे दूमिआसि मज्ज कए। संभावणेहकरणिज्जसरिसअं दाव विरइअं तुमए। अत्र मत्प्रियं रमयंत्या त्वया श
त्रुत्वं माचरितमिति लक्ष्यं। तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं॥ व्यंग्यस्य यथा। उवणिच्चलणि

निष्पंदाविसिणीपत्तम्मिरेहइवलाआ णिम्मणलमरगअभाअणपरिट्ठिआ संखसुत्तिव्व। अत्रनिष्पंदत्वेना
स्तत्वंतेन च जनरहितत्वमतः संकेतस्थानमेतदिति कयापि कंचित्प्रत्युच्यते। अथवा मिथ्यावदसि। न त्वमत्रगतो
भूरिति व्यज्यते। वाचकादीनां क्रमेण स्वरूपमाह। साक्षात्संकेतितं योर्थमभिधत्ते स वाचकः। इह गृहीतसंके
तस्य शब्दादर्थविशेषप्रतिपत्तेरभावात्संकेतसहाय एव शब्दोर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सं
केतो गृह्यते स तस्य वाचकः। संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा। यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्ति
योग्या व्यक्तिरेव तथाप्यानंत्यात् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्या
दीनां शब्दानां विषयविभागो न प्राप्नोतीति च तदुपाधावेव संकेतः। उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृ
च्छासंनिवेशितश्च। वस्तुधर्मोपि द्विविधः सिद्धः साध्यश्च। सिद्धोपि पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। आ
द्यो जातिः। उक्तं हि वाक्यप्रदीपे। गौः स्वरूपेण न गौर्नाप्यगौर्गोत्वाभिसंबंधात्तु गौरिति। द्वितीयो गुणः। शुक्ला
दिना हि लब्धसत्ताकं वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयवः क्रियारूपः। डित्थादिशब्दानामंत्यबुद्धिनि

शो

२

(6)

योऽयं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति स संज्ञारूपो यदृच्छात्मक इति।
गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः॥ परमाणुत्वादीनां मध्यपाठात्पा
रिभाषिकं गुणत्वं। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामथाश्रयभेदाद्भेद इव लक्ष्यते। यथैकस्य मुखस्य खड्ग
मुकुरतैलाद्यालंबनभेदात्। हिमपयःशंखाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्या
दिरभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादिसामान्यं॥ गुडतंडुलादिपाकादिष्वेवमेव पाकादित्वं। बालवृद्धशु
काद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थे वा डित्थादित्वमस्तीति सर्वेषां शब्दानां जाति
रेव प्रवृत्तिनिमित्तमित्यन्ये। तद्ग्रहणेनापोहो वा शब्दार्थः। कैश्चिदुक्त इति ग्रंथगौरवभयात्प्रकृतानुपयोगाच्च न दर्शितं। स
मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते। स इति साक्षात्संकेतितः। अस्येति शब्दस्य॥ मुख्यार्थबाधे तद्योगे रूढितो
ऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥ कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगात् गंगायां
घोष इत्यादौ च गंगादीनां घोषाद्यधिकरणत्वासंभवात् मुख्यस्यार्थस्य बाधे विवेकत्वादौ सामीप्ये च संबंधे रूढितः प्रसिद्धेः।

तथा गंगातटे घोष इत्यादेः प्रयोगाद्येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजना
च मुख्येनामुख्योर्थो लक्ष्यते यत्स आरोपितः शब्दव्यापारः सांतरार्थनिष्ठो लक्षणा ॥ स्वसिद्ध्ये परापेक्षः परार्थे स्वस
मर्पणं ॥ उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ कुंताः प्रविशंतीत्यादौ कुंतादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयो
गिनः पुरुषा आक्षिप्यंते ॥ तत उपादानेनेयं लक्षणा । गौरनुबंध्य इत्यादौ श्रुतिनोदितमनुबंधनं कथं मे स्यादिति जा
त्या व्यक्तिराक्षिप्यते । न तु शब्देनोच्यते ॥ विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति न्यायादित्युपादानल
क्षणा तु नोदाहर्तव्या न ह्यत्र प्रयोजनमस्तीति । न वा रूढिरियं । व्यक्त्यविनाभावित्वाच्च जात्या व्यक्तिराक्षिप्यते ॥
यथा ॥ क्रियतामित्यत्र कर्ता । कुरु इत्यत्र कर्म । प्रविश पिंडीमित्यादौ गृहं भक्षयेत्यादि च ॥ पीनो देवदत्तो दिवा न भुंक्ते इ
च त्यत्र रात्रिभोजनं न लक्ष्यते । श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् । गंगायां घोष इत्यत्र तटस्य घोषाधिकरण
त्वसिद्धये गंगाशब्दः स्वार्थमर्पयति । इत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा उपचारेणामिश्रित
त्वात् । अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यं तटादीनां गंगादिशब्दैः प्रतिपाद्यते । तत्र प्रतिपत्तौ हि प्रत ४

पिपादयिषितप्रयोजनसंप्रत्ययः। गंगासंबंधमात्रप्रतिपत्तौ तु गंगातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः
को भेदः। सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा॥ आरोप्यमाणआरोपविषयश्च यत्रानपह्नुतभेदौ सामाना
धिकरण्येन निर्दिश्यते। सा लक्षणा सारोपा। विषय्यंतःकृतेन्यस्मिन् सा स्यात्साध्यवसानिका॥ विषयिणारोप्य
माणेनांतःकृते निगीर्णेन्यस्मिन्नारोपविषये सति सा साध्यवसाना। भेदाविमौ च सादृश्यात्संबंधांतरतस्त
था गौणौ शुद्धौ च विज्ञेयौ। इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च॥
अत्र हि स्वार्थसहचारिणो गुणा जाड्यमांद्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनि
मित्तमुपयांतीति केचित्। स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यंते। न तु परार्थोभिधीय
त इत्यन्ये। साधारणगुणाश्रयणेन परार्थ एव लक्ष्यत इत्यपरे। उक्तं चान्यत्र। अभिधेयाविनाभूतप्रतीति
र्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति। अविनाभावोत्र संबंधमात्रं न तु नांतरीयकत्वं॥
न पुनरत्र अविनाभावमात्रं॥ तत्त्वे हि मंचाः क्रोशंतीति स्यादेव लक्षणा न स्यात्। आक्रोशनस्य पुरुषधर्मे

त्वात्तस्य चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तं। आयुर्घृतं आयुरेवेदमित्यादौ सादृश्यादन्यत्र कार्यकार
णभावादिसंबंधांतरात्। एवमादौ च कार्यकारणभावादिलक्षणा एवं मारोपाध्यवसाने। अत्र गौणभेदयो
र्भेदेपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनं। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च
कार्यकारित्वादि। क्वचित्तादर्थ्यादुपचारः यथा इंद्रार्था स्थूणा इंद्रः। क्वचित्तु स्वस्वामिभावाद्यथा राजकी
यः पुरुषो राजा। क्वचिदवयवावयविभावाद्यथा। अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः। क्वचित्तात्कर्म्या
त्। यथा अतक्षा तक्षा। लक्षणा तेन षड्विधा। आद्यभेदाभ्यां सह। सा च व्यंग्येन रहिता रूढौ सहिता तु प्रयो
जने। प्रयोजनं हि व्यंजनव्यापारगम्यमेव। तच्च गूढमगूढं वा। तत्र ज्ञेति व्यंग्यगूढं यथा। मुखं विकसित
स्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः। उरो मुकुलितस्तनं जघनमंस
बंधोद्धुरं बतेंदुवदनातनौ तरुणिमोद्गमो मोदते॥ अगूढं यथा। श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा विद
ग्धचरितानां॥ उपदिशति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिशतीति। तदेषा कथिता

५

10

त्रिधा। अव्यं स्यागूढव्यंग्या च। त[illegible]त्तन्मूलं लक्षिणिकः शब्दः। इति संबध्यते। तन्मूलत्वादाश्रयः। तत्र व्या
पारो व्यंजकात्मकः। कुत इत्याह। यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते। फले शब्दैकगम्येऽत्र व्यंज
नान्नापरा क्रिया। प्रयोजनप्रतिपिपादयिषया यत्र लक्षणा शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्ति
रपि तु तस्मादेव शब्दात्। न चात्र व्यंजनादृते अन्यो व्यापारः। तथाहि। नाभिधा समयाभावात्। गंगायां घो
ष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयंते। न तत्र गंगादिशब्दाः संकेतिता। हेत्वभावान्न लक्षणा॥
मुख्यार्थबाधादित्रयं हेतुः। तथा च लक्ष्यं न मुख्यं नाप्यत्र बाधा योगः फलेन नो। न प्रयोजनमेतस्मिन् न च श
ब्दः स्खलद्गतिः॥ यथा गंगाशब्दः स्रोतसि सबाध इति तटं लक्षयति तद्वद्यदि तटे सबाधः स्यात् तदा प्र
योजनं लक्षयेत्। न च तत्र मुख्योऽर्थो नाप्यत्र बाधा। न च गंगाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबं
धः। नापि प्रयोजने लक्ष्ये किंचित्प्रयोजनमस्ति नापि गंगाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।
एवमप्यनवस्था स्यात् या मूलक्षतिकारिणी। एवमपीति प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनांतरेण तदपि प्रयो

जनांतरेण इतिप्रकृताप्रतीतिहृदनवस्थाभैवात्। ननुपावनत्वादिधर्मयुक्तमेवतटंलक्ष्यतेगंगायांस्तटेघोषइ
तोधिक[illegible]स्यार्थस्यप्रतिपत्तिश्चप्रयोजनमितिविशिष्टलक्षणात्किंव्यंजनेनेत्यतआह॥
प्रयोजनेनसहितंलक्षणीयंनयुज्यते॥कुतइत्यतआह। ज्ञानस्यविषयोह्यन्यःफलमन्यदुदाहृतं।प्रत्य
क्षादेर्हिनीलादिविषयःफलंतुप्रकटतासंवित्तिर्वा॥विशिष्टलक्षणानैवं। व्याख्यातं। विशेषाःस्युस्तुलक्षि
ते।तटादौविशेषाःपावनत्वादयस्तेचाभिधातात्पर्यलक्षणाभ्योव्यापारांतरेणगम्याः।तच्चव्यंजनध्वनन
द्योतनादिशब्दवाच्यमवश्यमेषितव्यं। एवंलक्षणामूलंव्यंजकत्वमुक्त्वाभिधामूलंत्वाह॥अनेकार्थस्यश
ब्दस्यवाचकत्वेनियंत्रिते।संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं॥संयोगोविप्रयोगश्चसाहचर्यंविरो
धिता।अर्थःप्रकरणंलिंगंशब्दस्यान्यस्यसंनिधिः।सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः।शब्दा
र्थस्यानवच्छेदेविशेषस्मृतिहेतवः।इत्युक्तदिशा।सशंखचक्रोहरिरशंखचक्रोहरिरितिविष्णौ।रामलक्ष्म
णावितिदाशरथौ।रामार्जुनगतिस्तयोरितिभार्गवकार्तवीर्ययोः।[illegible]स्याणुंभजभवच्छिदे।इतिहरे।सर्वज्ञा

६

नातिदेवः इतियुष्मदर्थे। कुपितोमकरध्वज इति कर्मादेवस्य पुरोरातेरितिंशमो। मधुनामत्तकोकिल इतिव
संते। पातुवोदयितामुखमिति सामुख्या। भात्यत्रपरमेश्वर इति राजधानीरूपादेशात्प्राज्ञः। चित्रभानुर्विभा
तीति दिनेरवौ रात्रौ वन्हौ। मित्रंभातीति सुहृदि मित्रोभातीति रवौ। इंद्रशत्रुरित्युरित्यादौ वेद एव न काव्ये स्व
रोविशेषप्रतीतिकृत्। आदिग्रहणात्॥ एहहमित्तबणियाएहहमित्तेहिं अच्छिवत्तेहिं। एहहमित्तवत्थाए
हहमित्तेहिं दिअहेहिं॥ इत्यादावभिनयादयः। इत्थं संयोगादिभिरर्थांतराभिधायकत्वे निवारितेप्यने
कार्थस्यशब्दस्य यत्क्वचिदर्थांतरप्रतिपादनं तत्र नाभिधा नियमनात्तस्या न लक्षणा। मुख्यार्थबाधाद्य
भावादपि। व्यंजनं व्यंजनमेव व्यापारः। यथा। भद्रात्मनोदुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुख
संग्रहस्य। यस्यानुपप्लुतगतेः परवारणस्य दानांबुसेकसुभगः सततं करोभूत्। तद्युक्तोव्यंजकः शब्दः तद्युक्तो
व्यंजनयुक्तः। यत्सोर्थांतरयुक्तोथा। अर्थोपिव्यंजकस्तत्र सहकारितयामतः। तत्रेति व्यंजकः॥ इतिश्रीका
व्यप्रकाशे शब्दनिर्णयो नाम द्वितीय उल्लासः॥ ॥ अर्थाः प्रोक्ताः पुरातेषां॥ अर्थावाच्यलक्ष्यव्यं

ग्याः। तेषां वाचकलाक्षणिकव्यंजकानां। अर्थव्यंजकतोच्यते। कीदृशीत्याह। वक्तृबोद्धव्यकाकूनां वाक्य
वाच्यान्यसंनिधेः। प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां। योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव [illegible]।
सा॥ बोद्धव्यः प्रतिपाद्यः काकुर्ध्वनेर्विकारः प्रस्तावप्रकरणं। अर्थस्य वाच्यलक्ष्यव्यंग्यात्मनः [illegible]
क्रमेणोदाहरणानि॥ अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरियं। समसेयसलिलणीसा
सणीसहा वीसमामि षणं। अत्र चौर्यरतगोपनं गम्यते। ओण्णिद्दं दोब्बल्लं चिंता अलसत्तणं सणीससि
अं। मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ॥ अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते। तथाभूतां
दृष्ट्वा नृपसदसि पांचालतनयां वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः। विराटस्यावासे स्थितम
नुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु। अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति
काका प्रकाश्यते न वाच्यसिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वं शक्यं। प्रश्नमात्रेणापि काकोर्विश्रां
तेरन। तइया मह गंडत्थलणिमियं दिट्ठिं ण णेसि अण्णत्तो। एह्णिं स च्चेय अहं ते अ कवोला ण सा दिट्ठी॥ अ

त्रमत्तरंवीकपोलप्रतिबिंबितांपश्यतस्ते दृष्टिरन्यैवाभूत्। चलितायांतुतस्यामन्यैवजातेत्यहोप्रछ
न्नकामुकत्त्वंतेइतिद्योत्यते।उद्देशोयंसरसकदलीश्रेणिशोभातिशायीकुंजोत्कर्षःकुसुमितरमणी
विभ्रमो नर्मदायाः॥ किंचैतस्मिन्सुरतसुहृदस्तान्विते वांतिवातायेषामग्रेसरातिकलिताकांडकोपा
मनोभूः।अत्ररतार्थप्रविशेतिव्यंग्यं।णोल्लेइअणुल्लमणाअत्ताममघरभरम्मिसअलम्मि।खण
मत्तंजइसंझाइहोइणवहोइवीसामो।अत्रसंध्यासंकेतकालइतितटस्थंप्रतिकयाचित्द्योत्यते।सुव
इसमागमिस्समिदितुह्मायितुअह्मसपहरमेतेण।एमेअकिंतिचिवासितासहिसज्जेसुकरणीज्जं॥अ
त्रोपपतिंप्रत्यभिसर्तुंप्रस्थितानयुक्तमितिनिवार्यते।देशवैशिष्ट्यं।अन्यत्रयूयंकुसुमावचयंकुरुध्व
मत्रास्मिकरोमिसख्यः॥ नाहंहिदूरंशायितुंसमर्थाप्रसीदतायंरचितोंजलिर्वः।अत्रविविक्तोयंदेशइतित्र
छन्नकामुकस्त्वयाविसृज्यइतितुरास्वस्तांप्रतिकयाचिन्नवेद्यतइति।कालवैशिष्ट्यंयथा॥गुरुजणप
पिअकिंभणामितुह मंदभाइणीयअहं।अज्जपवासंवच्चसिवज्जसअंजेव्वमुणसिकरणिज्जं

अद्यमधुसमयेयदिव्रजसितदाहंतावन्नभवामि।तवतुनजानामिगतिमितिव्यज्यते।आदिग्रहणाच्चेष्टादेः।यथ।।
हारोपांतनिरंतरमायितयासौंदर्यसारश्रियाप्रोद्दत्रास्योरुयुगंपरस्परसमासक्तंसमादितं।आनीतंपुरतःशि
रोंशकमधःक्षिप्तेचलेलोचनेवाचस्तत्रनिधायितंप्रसरणंसंकोचितेदोर्लते।।अत्रप्रच्छन्नचेष्टयाप्रच्छ
न्नकामुकविषयाकृतविशेषविशेषोध्वन्यते।।निराकांक्षत्वप्रतिपत्तयेप्रागभावसरतयापुनःपुनरुदाह्रीयते।।
वक्त्रादीनांमिथःसंयोगेद्विकादिभेदेनक्रमेणलक्ष्यव्यंग्ययोश्चव्यंजकत्वमुदाहार्यं।।अत्तुएत्थुणमज्जइएत्थ
अहंदिअसअंपुलोएसु।मयाहिअरत्तिअंधअसज्जाएमहणुमज्जहिसि।।शब्दप्रमाणवेद्योर्थोव्यनक्त्यर्थां
तरंयतः।अर्थव्यंजकत्वेतच्छब्दस्यसहकारिता।।शाब्देतिनहिप्रमाणांतरवेद्योव्यंजकः।।इतिकाव्यप्रका
शेर्थनिर्णयोनामतृतीयोल्लासः।। ।।यद्यपिशब्दार्थयोर्निर्णयेकृतेदोषगुणालंकाराणांस्वरूपविधा
नीयंतथापिधर्मिणिप्रदर्शितेधर्माणांहेयोपादेयताज्ञायतइतिप्रथमंकाव्यभेदानाह।अविवक्षितवाच्योय
स्तत्रवाच्यंभवेद्ध्वनौ।अर्थांतरेसंक्रमितमत्यंतंवातिरस्कृतं।।लक्ष्यमूलगूढव्यंग्यप्राधान्येसत्यविवक्षितंवा

व्यंग्यत्वमतः। ध्वन्यावित्यनुवादाद्ध्वनिरिति ज्ञेयः। तत्र वाच्यं क्वचिदनुपयुज्यमानत्वादर्थांतरे परिणतं। यथा। त्वामस्मि वच्मि
विदुषां समुदायोऽत्र तिष्ठति। आत्मीयमतिमादाय स्थितिरत्र विधेहि तत्। अत्र वचनादुपदेशरूपतया परिणमति। क्व
चित्पुनरनुपपद्यमानत्वात्तदत्यंतं तिरस्कृतं। यथा। उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परं। विदधदीदृशमे
व सदा सखे सुखितमास्स्व ततः शरदां शतं॥ एवमपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति॥ विवक्षिते चान्यपरं वाच्य
यत्रा[illegible]परस्तु सः॥ अन्यपरं व्यंग्यनिष्ठं। एष च कोऽप्य[illegible]लक्ष्यक्रमलक्ष्यव्यंग्यक्रमः परः। अलक्ष्येति। न खलु
विभावानुभावव्यभिचारिभाव एव रसः। अनुरसस्तैरित्यतिक्रमः। स खलु न लक्ष्यते इति तत्र। रसभावतदाभा
सभावशांत्यादिरक्रमः। भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः। आदिग्रहणाद्भावोदयभावसंधिभा
वशबलत्वानि। प्रधानतया यत्र रसादिस्तत्रालंकार्यः। यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्रां
गभूतो रसादिस्तत्र गुणीभूतव्यंग्ये रसवत्प्रेयऊर्जस्वित्समाहितादयोऽलंकाराः। ते च गुणीभूतव्यंग्याभि
धाने उदाहरिष्यंते। तत्र रसस्वभावमाह। कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायि

नो लोके तानि चेन्नाट्यकाव्ययोः ॥ विभावानुभावास्तत्कथ्यंते व्यभिचारिणः ॥ व्यक्तः स तैर्विभावाद्यैः स्थायि
भावो रसः स्मृतः । उक्तं हि भरते । विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति । एतद्विवृण्वते । विभावैर्ल
लनोद्यानादिभिरालंबनोद्दीपनकारणैः स्थायि रत्यादिको भावो जनितः । अनुभावैः कटाक्षभुजाक्षेपादि
भिः कार्यैः प्रतीतियोग्यः ॥ (अनुभाववाच्यः) व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये
तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः । राम एवायमयमेव राम इति न रामो
ऽयमित्यौत्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा नवायमिति रामसदृशोऽयमिति च सम्यङ्मिथ्यासं
शयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे सेयं ममांगेषु
सुधारसच्छटा सुधूरकर्पूरशलाकिका दृशोः ॥ मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥
देवादहमनया च पलायमाने त्र्या वियुक्तश्चा आविरलविलोलजलदः कालः समुपागतश्चायमित्या
दिकाव्यानुसंधानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणका

कार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दैर्व्यपदेश्यैः संयोगात् गम्यगमकभावरूपादनुमी
यमानोपि वस्तुसौंदर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणस्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रास
न्नपि सामाजिकानां चर्व्यमाणो रस इति श्रीशंकुकः। न ताटस्थ्येनात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्य
ते। अपि च काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्था
यी सत्त्वोद्रेकप्रकाशानंदमयसंविद्विश्रांतिसत्त्वेन भुज्यत इति भट्टनायकः। लोके प्रमदादिभिः कारणादिभिः स्था
य्यनुमानेऽभ्यासपाटवात् काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिक
विभावादिशब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैत इति संबंधिवि
शेषस्वाकारपरिहारनियमानवसायात् साधारण्येन प्रतीतेरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः
स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशो
न्मिषितवेद्यांतरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नो

पिगोचरीकृत चर्व्यमाणैतैकप्राणो विभावादिजीवनावधिः। पानकरसन्यायेन चर्व्यमानः पुर इव परिस्फुरन् हृदयमि
व प्रविशन् सर्वांगीणमिवालिंगन्नन्यत्सर्वमिव तिरोदधनू ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारका
री शृंगारादिको रसः। स च न कार्यो विनाशेपि तस्य संभवप्रसंगात्। नापि ज्ञाप्यः सिद्धस्य तस्य भावात् अपितु विभावा
दिभिर्व्यंजितश्चर्वणीयः॥ कारकज्ञापकाभ्यामन्य[illegible]त्क दृष्टमिति चेन्न क्वचिद्दृष्टमित्यलौकिकप्रसिद्धेर्भूषण
मेतन्न दूषणं। चर्वणानिष्पत्त्या तन्निष्पत्तिरुपचरितेति कार्योप्युच्यतां। लौकिकप्रत्यक्षादिप्रमाणतटस्थ्यादि
वबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शनहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोको
त्तरस्वसंवेदनगोचर इति प्रत्ययोप्यभिधीयतां। तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शनप्रधानत्वात्॥ ना
पि विकल्प्यस्चर्व्यमाणस्यालौकिकानंदमयस्य तस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्वव
ल्लोकोत्तरतामेव गमयति। न तु विरोध इति श्रीमदाचार्याभिनवगुप्तपादाः॥ व्याघ्रादयो विभावाः भयानकस्येव वी
राद्भुतरौद्राणां अश्रुपातादयोनुभावाः शृंगारस्येव करुणभयानकयोः चिंतादयो व्यभिचारिणः॥ शृंगारस्येव वी

रस्यकरुणाभयानकानां॥ इतियगानेकांतिकत्वात्सूत्रेमिलितानिर्दिष्टाः॥ विपदलितमल्लिनांबुगर्भेमेघंमधुकरकोकिल
कूजितैर्दिशांश्रीः॥ अवनिरभिनवांकुरांकटंका प्रणतिपरेदयितेप्रसीदमुग्धे॥ इत्यादौ॥ पारमृदितमृणालीम्लानमंगप्र
वृत्तिः कथमपिपरिवारप्रार्थनाभिःक्रियासु॥ कलयतिचहिमांशोर्निष्कलंकस्यलक्ष्मीमभिनवकमिदंतच्छेदपांडुक
पोलः॥ इत्यादौ॥ दूरादुत्सुकमागतेविचलितंसंभाषिणिस्फारितंसंश्लिष्यत्युनरग्रहीतवचनेकिंचांचितंभ्रूलतं॥
मानिन्याश्चरणानतिव्यतिकरेवाष्पांबुधौताननंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसि॥ इत्यादौ॥ यद्य
पिविभावानामनुभावानांऔत्सुक्यव्रीडाहर्षकोपादेर्यप्रसादानांचव्यभिचारिणांकेवलानामेवास्तिस्थितिः
तथाप्येतेषामसाधारणत्वमित्यन्यतमद्व्याक्षेपत्वेसतिनानैकांतिकमिति॥ तद्विशेषानाह॥ शृंगारहास्यकरु
णरौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौचेत्यष्टौनाट्येरसाःस्मृताः॥ तत्रशृंगारस्यद्वौ[illegible]भेदौ॥ संयोगोवि
प्रलंभश्चेति॥ तत्राद्यःपरस्परावलोकनाधरपानचुंबनाद्यनंतभेदत्वादपरिच्छेद्यइत्येकएवगण्यते॥ यथा॥ शून्यंवास
गृहंविलोक्यशयनादुत्थायकिंचिच्छनैर्निद्राव्याजमुपागतस्यसुचिरंनिर्वर्ण्यपत्युर्मुखं॥ विश्रब्धंपरिचुंब्यजा
तपुलकामालोक्यगंडस्थलीं॥ लज्जानम्रमुखीप्रियेणहसताबालाचिरंचुंबिता॥ यथा॥ त्वंमुग्धाक्षिविनैवकंचु

लिकयाथस्मेमनोहारिणीं लक्ष्मीमित्यभिधायिनी प्रियतमे तद्दृष्टिकासंस्पृशि ॥ शय्यापांते निविष्टसस्मितसखीने
त्रोत्सवानंदिते निर्यातः शनकैरलीकवचनोपन्याससमालीजनः ॥ अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुक इति
पंचविधः । क्रमेणोदाहरणानि ॥ प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधु
राश्चेष्टा भवेयुर्मयि । यासामंतःकरणस्य बाह्यकरणव्यापाररोधिक्षणादाशंसत परिकल्पितास्वपि भवत्यानंदसां
द्रो लयः ॥ अन्यत्र व्रजतीति कः खलु कथाप्यैनाप्यस्य गादृक्सुहृद्यो मां नेच्छति नागतश्च सहसा कोऽयं विधेः प्रक्रमः
इत्यल्पेतरकल्पनाकवलितस्वांता निशांतांतरे बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥ एषा विर
होत्कंठिता । सा पत्युः प्रथमेपराधसमये सख्योपदेशं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनं । स्व
च्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः ॥ प्रस्थानं वलयैः
कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः । यातुं निश्चलचेतसि प्रियतमे सर्वैः
समं प्रस्थितं गंतव्ये सजीविते प्रियसुहृत्सार्थः किमुत्सृज्यते ॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामा
त्मानं ते चरणपतितं यावदिच्छामि कर्तुं । अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संग

मंनोक्ततोतः। हास्यादीनां क्रमेणोदाहरणं। आकुंचपाणिमशुचिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रे। तारस्वनं
प्रहितथूत्कमदात्प्रहारं हा हा हतोऽहमिति रोदिति विष्णुशर्मा॥ हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो धिक्प्रा
णान्पतितोऽशनिर्हुतवहस्तेंगेषु दग्धे दृशौ। इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गिरश्चित्रस्थानपि रोदयंति शत
धा कुर्वंति भित्तीरपि॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरक
रिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं॥ क्षुद्राः संत्रासमेते विजहित हरयः क्षु
ण्णशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतंतः। सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषां नन्वहं मेघना
दः किंचित्संरंभलीलानियमितजलधिं राममन्वेषयामि॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने दत्तदृष्टिः पश्चार्द्धे
न प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं। शष्पैरर्द्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वा
द्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडा
द्यवयवसुलभान्युग्रपूतीनि जग्ध्वा। आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुट

गतमपि कव्यमव्यग्रमन्ति ॥ चित्रं महानेष तवावतारः क्व कांतिरेषाभिनवैव भंगिः । लोकोत्तरं धैर्यमहो प्रभावाः काप्याकृ
तिर्नूतन एष सर्गः ॥ एषां स्थायिभावानाह रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्साविस्मयश्चेति स्थायी
भावाः प्रकीर्तिताः ॥ व्यभिचारिणो ब्रुवते । निर्वेद१ ग्लानि२ शंकाख्या३ तथासूया४ मदः५ श्रमः६ । आलस्यं७ चैव दै
न्यं च८ चिंता९ मोहः१० स्मृति११ र्धृतिः१२ । व्रीडा१३ चपलता१४ हर्ष१५ आवेगो१६ जडता तथा१७ ॥ गर्वो१८ विषाद१९ औ
त्सुक्यं२० निद्रा२१ पस्मार२२ एव च । सुप्तं२३ प्रबोधो२४ मर्षश्चा२५ प्यवहित्थ२६ मथोग्रता२७ ॥ मति२८ र्व्याधि२९ स्तथो
न्माद३० स्तथा मरणं३१ मेव च । त्रासश्चैव३२ वि[illegible] तर्कश्च३३ विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्याता
स्तु नामतः ॥ निर्वेदस्यामंगलरूपस्य प्रथममनुपादेयत्वेप्युपादानं व्यभिचारित्वेपि स्थायिताभिधानार्थं तेन निर्वेदोपि
स्थायिभावः ॥ शांतो नवमोस्ति रसः । यथा । अहो वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ
वा सुहृदि वा । तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ रतिर्देवादिविष
या व्यभिचारी तथांजितः ॥ भाव प्रोक्तः ॥ आदिपदान्मुनिगुरुनृपपित्रादिविषया । कांताविषया तु न व्यक्तः शृंगारः । कंटको

२ १२

नाथानिविष्टमीशतेकालकूटमपिमेमहामृतं। अप्युपांतममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते। हरस्य धर्मं प्रति हेतुरेष्य-
तः श्रुभस्य पूर्वाचरितैः कृतं शुभैः शरीरभाजां भवतीय दर्शनं तनोति कालत्रितयेपि योग्यतां। एवमन्येप्युदाहार्याः।।
व्यभिचारी यथा।। जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया मा मां संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता ततः
नोयावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः।। अत्र विधिं
प्रत्यसूया। तदाभासा अनौचित्यप्रवर्तिताः। तदाभासा रसाभासा भावाभासाः। तत्र रसाभासो यथा।। स्तुमः कं
वामाक्षि क्षणमपि विनायेन रमसे विलेभे कः प्राणेनूरणमखमुखेयं मृगयसे। सुलभ्ये को जातः शशिमुखियमालिं
गसि बलात्त्रपाश्रीः कस्यैषा मदननगरि ध्यायसि तु यं। अत्रानेककामुकविषयमभिलाषं तस्याः स्तुमः इत्याद्यनु
गतं बहुव्यापारोपादानं व्यनक्ति। भावाभासो यथा।। राकासुधाकरमुखी तरलायताक्षी सस्मेरयौवनतरंगतव
विभ्रमास्याः। तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतव्यतिकरे करवाण्युपायः।। अत्र चिंता अनौचित्य
प्रवर्तिता। एवमन्येप्युदाहार्याः।। भावस्य शांतिरुदयः संधिः शबलता यथा।। क्रमेणोदाहरणं। तस्याः सांद्रविलेप

२६

नस्तनतटेप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते। इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्र
मार्ष्टुं मया सा श्लिष्टा रभसेन तत्सुखवशात्तस्याश्च तद्विस्मृतं॥ अत्र कोपस्य। एकस्मिन्शयने विपक्षरमणीनामग्र
हे मुग्धया सद्यः कोपपराङ्मुखग्लपितया चाटूनि कुर्वन्नपि। आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्मा
भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः॥ औत्सुक्यस्य। उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतस्तत्संग
प्रियता च वीररभसोत्फालश्च मां कर्षति। वैदेहीपरिरंभ एष च बहुश्चैतन्यमामीलयन्नानंदी हरिचंदनेंदुशिशिरः
स्निग्धो रुणद्ध्यन्यतः। अत्रावेगहर्षयोः संधिः॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय नः श्रु
तमहो कोपेपि कांतं मुखं। किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्यो
धरं धास्यति॥ अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां भावस्थितिस्तत्क्रमाउदाहृता च। मुख्येन
सोपि ते ऽङ्गित्वं प्राप्नुवंति कदाचन। ते भावाः शांत्यादयः। अंगित्वं चराजानुगतविवाहप्रवृत्तभृत्यवत्। अमुं चानाभसं
लक्ष्यक्रमव्यंग्यस्थितिस्तु यः॥ शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः॥ शब्दशक्तिमूलानुरणनरूपव्यंग्यो

प्र

१३

र्थशक्तिमूलानुरणनरूपव्यंग्यः॥उभयशक्तिमूलानुरणनरूपोव्यंग्यश्चेतित्रिविधः।तत्राद्यलंकारोथवस्तुवशाद्वायत्रा
वभासते॥प्रधानत्वेनसज्ञेयःशब्दशक्त्युद्भवोद्विधा।वस्त्वेवेति।अनलंकारंवस्तुमात्रं॥आद्योयथा।उल्लास्यकालक
रवालमहांबुवाहंदेवेनयेनजरठोर्जितगर्जितेन।निर्वापितःसकलएवरणेरिपूणांधाराजलैस्त्रिजगतिज्वलितःप्रता
पः॥अत्रवाक्यस्यासंबद्धार्थाभिधायकत्वंमाप्रसांक्षीदित्यप्राकरणिकयोरुपमानोपमेयभावःकल्पनीयइत्यु
त्रोपमालंकारोव्यंग्यः॥तिग्मरुचिरप्रतापोविधुरविशंकीद्विभोमधुरलीलः॥मतिमानतत्त्ववृत्तिःप्रतिपदपक्षाग्र
णीर्विभातिभवान्॥अत्रैकैकस्यद्विपदत्वेनविरोधाभासः॥अमितःसमितःप्राप्तैरुत्कर्षैर्हर्षदप्रभो॥अहितःस
हितःसाधुयशोभिरसतामसि॥अत्रापिविरोधाभासः।निरुपादानसंभारमभित्तावेवतन्वते।जगच्चित्रंनमस्तस्मैकला
श्लाघ्यायशूलिने॥अत्रव्यतिरेकः।अलंकार्यस्यापिब्राह्मणश्रमणन्यायेनालंकारता।वस्तुमात्रंयथा।पथिअ
णइत्थसत्थरमत्थमणपत्थरत्थलेगामे॥उणअपओहरंपेखिउणजइवससितावससु॥अत्रयद्युपभोगक्षमोसि
तदास्वेतिव्यज्यते॥शनिरशनिश्चतमुच्चैर्निहंतिकुप्यसिनरेंद्रयस्मैत्वं।यस्मैप्रसीदसिपुनःसभात्युदारोनुदारश्च॥अत्र

२= पथिकनात्रसंस्तरोस्तिमनाक्प्रस्तरस्थलेग्रामे।उन्नतपयोधरंदृष्ट्वायदिवससितद्वस॥=२

त्रविरुद्धावपित्वदनुवर्तनार्थएकंकार्यंकुरुतइतिव्यत्ययेनवस्तुध्वन्यते।अर्थशक्त्युद्भवोप्यर्थोव्यंजकःसंभवीस्वतः।
प्रौढोक्तिमात्रात्सिद्धोवाकवेस्तेनोक्तितस्यवा॥वस्तुवालंकृतिर्वेतिषड्भेदोसौव्यनक्तियत्।वस्तुस्वलंकारमथवा
तेनायंद्वादशात्मकः।इदंप्रथमकल्पितस्वतःसंभवीचेति।द्विविधोर्थः।तत्रस्वतःसंभवीनकेवलंभणितिमात्रनि
ष्पन्नोयावद्बहिरपिऔचित्येनसंभाव्यमानः।कविनाप्रतिभानमात्रेणबहिरसन्नपिनिर्मितः॥कविनिबद्धेन
वाक्त्रेतिद्विविधोपरइतित्रिविधः।वस्तुवालंकारोवाऽसावितिषोढाव्यंजकः।तस्यवस्तुवालंकारोवाव्यंग्यः॥
द्वादशभेदोर्थशक्त्युद्भवोध्वनिः॥क्रमेणोदाहरणानि।अलससिरोमणिधुत्ताणअग्गिमोपुत्तिधणसमिद्धिमओ॥
इमभणिएणणअंगीपफुल्लविलोअणाजाआ॥अत्रममैवभुक्तभोग्यवस्तुनावस्तुव्यज्यते॥धन्यासियाकथ
क यसि■प्रियसंगमेपिविश्रब्धचाटुशतानिरतांतरेषु।नीवींप्रतिप्रणिहितस्तुकरःप्रियेणसख्यःशपामियदिकिंचि
दपिस्मरामि॥अत्रत्वमधन्याहंधन्येतिव्यतिरेकालंकारः।दर्पांधगंधगजकुंभकपाटकूटसंक्रांतिनिघ्नघन
शोणितशोणशोचिः।वीरैर्व्यलोकियुधिकोपकषायकांतिःकालीकटाक्षइववयस्यकरेकृपाणः॥अत्रोपमालंका १५

अलसशिरोमणिर्धूर्तानामाद्यःपुत्रिधनसमृद्धिमयः इतिभणितेननतांगीप्रफुल्लविलोचनाजाता॥

रेणसकलरिपुबलक्षयंक्षणात्करिष्यतइतिवस्तु॥गाढक्रांतदशनक्षतव्यथासंकटादरिवधूजनस्ययः॥ओष्ठविद्रुमदला
न्यमोचयन्निर्दशनूयुधिरुषानिजाधरं॥अत्रविरोधालंकारेणाधरंनिर्दशनसमकालमेवशात्रवोव्यापादितादृतितु
ल्ययोगिता॥ममसत्याप्यन्यस्यक्षतिनिर्वर्तनामितितद्बुद्धिरुत्प्रेक्षतेइत्युत्प्रेक्षाच॥एषूदाहरणेषुस्वतःसंभवीव्यंजकः॥
कैलासस्यप्रथमशिखरेवेणुसंमूर्छनाभिःश्रुत्वाकीर्तिविबुधरमणीगीयमानांयदीयां।स्रस्तापांगाःसरसबिशिनीकांडसंजातशं
कादिङ्मातंगाःश्रवणपुलिनेहस्तमा[illegible]वर्तयंति॥अत्रवस्तुनायेषामपिश्रयाधिगमोनास्तितेषामप्येवमादिबुद्धिजननेन
चमत्कारंकरोतीतित्वत्कीर्तिरितिध्वन्यते॥केसेसुवलामोडिअतेणअमरंम्मिजअसरीगहिता।जहकंदराहिविधुरा
तसदढंकंठअम्मिसंठविआ॥अत्रवस्तुनाकेशाग्रहावलोकोद्दीपितमदनाइवकंदरास्तद्विधुरान्कंठेग्रहतीत्युत्प्रे
क्ष्यो चात्एकत्रसंग्रामेविजयदर्शनात्तस्यारयःपलाय्यगुहासुतिष्ठंतीतिकाव्यहेतुः॥नपलाय्यगतास्तद्वैरिणो
पितुततःपराभवंसंभाव्यतानकंदरानत्यजंति॥इत्यपन्हुतिश्च॥गाढालिंगनरहसुज्जअम्मिदइएलहुसमोसरइ॥मा
णंसिणीणमाणोपेहलणभीउव्वहिअस्स॥अत्रोत्प्रेक्षाप्रत्यालिंगनादितत्रउत्तभतइतिवस्तु।जोठंरवहसंतीकर

केशेषुबलात्कारेणतेनसमरेजयश्रीर्गृहीता।यथाकंदराभिर्धीरास्तस्यदृढंकंठेसंस्थापिताः॥

॥गाढालिंगनरभसोद्यतेदयितेलघुमपसरति।मनस्विन्यामानःपीडाभीतइवहृदयात्॥

याम्रस्थविरभिवहसंतीकथिवरमंबुरुहवद्धनिवेशा॥दर्शयति भुजमंडलमन्यदिवजयति सावाणी॥
येलंकागिरिमेखलायाःखलखलिता संभोगखिन्नोरगास्फारोत्फुल्लफणावलीकवलनात्प्रा प्तादरिद्रत्वं॥तेइदानीमलयानिला विरहिणीनिश्वाससंपर्कि णोजाता भटिति शिशुत्वेपि
बहुलस्ता रूण्यपुण्याइव॥

वेश्रणवुरुहबद्धनिवेशा॥दावेइभुअणमंडलमस्संदिअजअइसावाणी॥अत्रोत्प्रेक्षा चमत्कारैककारणं।नवंनवंजग
दजल्जासमनस्यानिर्मिमीतइतिव्यतिरेकः॥एषुकविप्रौढोक्तिमात्रनिष्पन्नशरीरोव्यंजकः।जेलंकागिरिमेहलाहि
खलिदासंभोअखिन्नोइरइफारफुल्लफणावलीकवलनेपत्तादरिद्दत्तणं॥तेइन्हिंमलआणिलाविरहिणीणी
सासंसंवक्किणोजादभत्तिसिसुत्तणेविबहलातारुण्णपुण्णाइव॥अत्रनिश्वासैःप्राप्तेश्वर्यैःकिंकिंनकुर्वतइति
वस्तुनावस्तुव्यज्यते।साहिविज्जमाणसममम्मधीरत्तणेणआसासं।पिअदंसणविहलरवणम्मिहंसहसंतेणआ
सरिअं॥अत्रवस्तुनाआकृतेपिप्रार्थनेतिविभावना॥प्रियदर्शनस्यसौभाग्यबलंधैर्येणसोढुंनशक्यतइत्युत्प्रे
क्षाच॥उद्दत्तोद्दत्तकारअरअणखणेहितुंहल्लोअलोसुमहिदिसांरत्तंसुअप्पसाअंकोवेणपुणोइमेणअक्कमिआ॥अ
त्रकिमितिलोचनेकुपितेवहसिइतिउत्तरालंकारेणनकेवलंआर्द्रनखक्षतानिगोपायसियावत्तेपामहंप्रसादपा
त्रंजातेतिवस्तु।महिलासहस्सभरिएतुहहिअएसुमहअसाअमअंति॥अणुदिणमणण्णकम्मा
अंगंतणुअंपितणुएइ॥अत्रहेतुलंकारेणतनोस्तनूकरणेपितवहृदयेनवर्ततइतिविशेषोक्तिःएषुकवि

सखिधिरय्यमानस्यममधीरत्वेनाश्वासं।प्रियदर्शनविश्रंगलक्षणेसहसैतितेनापस्त॥ आर्द्रीकृतनखदशनक्षतैस्तवलोचनयोर्ममदत्तःजनकोपुकप्रसादःकोपेनपुनरिमेनक्रांते॥
महिलासहस्रभरितेतवहृदयेसुभगसामाति।अनुदिनमनन्यकर्मीअंगंतन्वपितन्वयति॥

शोभमूषणेऽपिविशेषःकश्चिद्वाच्यमुखिषि।

निबंधवक्रप्रौढोक्तिमात्रनिष्पन्नशरीरोव्यंजकः। एवं द्वादशभेदाः। शब्दार्थोभयभूरेकोयथा। अतंद्रचंद्राभरणासमुद्दी
पितमन्मथा। तारकातरलश्यामासानंदं नकरोतिकिं॥ भेदाअष्टादशाऽस्यतते॥ अस्येतिध्वनेः॥ ननुरसादीनांब
हुभेदत्वेकथमष्टादशेत्याह। रसादीनामनंतत्वाद्भेदएकोहिगण्यते। अनंतत्वादिति। तथाहि। नवरसास्तत्रशृंगार
स्यद्वौभेदौसंभोगोविप्रलंभश्च। संभोगस्यापिपरस्परदर्शनालिंगनपरिचुंबनादिकुसुमोच्चयजलकेलिसूर्यास्तमय
चंद्रोदयऋतुवर्णनादयोभेदाः॥ विप्रलंभस्यापिअभिलाषादयउक्ताः। तयोरपिविभावानुभावव्यभिचारि
वैचित्र्यं। तत्रापिनायकयोरुभयोरुत्तममध्यमाधमप्रकृतित्वं तत्रापिदेशकालावस्थादिभेदः। इत्येकस्यैवरसस्यानंत्य
कागणनात्वन्येषां। अस्य संलक्ष्यक्रमत्वंतुसामान्यमाश्रित्यरसादिध्वनिरेकएवगण्यते॥ वाक्ये द्व्युत्थः॥ द्व्यु
त्थइतिशब्दार्थोभयशक्तिमूलः। पदेप्यन्ये। अपिशब्दाद्वाक्येपि॥ एकावयवस्थितेनभूषणेन कामिनीवपद
द्योत्येनव्यंग्येनवाक्यंव्यंग्यापिभारतीभासते। तत्रपदप्रकाशनेक्रमेणोदाहरणं। यस्यमित्राणिमित्राणिशत्रवः
शत्रवस्तथा। अनुकंप्योनुकंप्यश्चसजातःसचजीवति। अत्रद्वितीयमित्रपदशब्दाश्वस्तत्वनियंत्रणेनचाऽर्थे।

अविवक्षितवाच्यस्यार्थांतरसंक्रमितवाच्यस्योदाहरणं २

खलव्यवहारादृश्यंते दारुणा यद्यपि तथापि धीराणां। हृदयेवयस्यबहुमता न खलु व्यवसाया मुंचंति २

पात्रतादिसंक्रमितवाच्याः॥ विवक्षितान्यपरवाच्यस्यालक्ष्यक्रमव्यंग्यस्योदाहरणं। अत्यंततिरस्कारस्योदाहरणं
खलववहारा दीसंती दारुणा जइवि तहवि धीराणं। हिअएवअस्सबहुआ ण हु ववसाआ मुज्जंति॥ विवक्षितान्य
परवाच्यस्यालक्ष्यक्रमव्यंग्यस्योदाहरणं॥ लावण्यं तदसौ कांतिस्तद्रूपं स वचःक्रमः। तदा सुधास्पदमभूदधुना तु
ज्वरोपमं॥ अत्र तदादिपदैरनुभावैकगोचराः अर्थाः प्रकाश्यंते॥ (तस्योदाहरणं) यथा वा मुग्धे मुग्धतयैव नेतुमखिलः कालः कि
मारभ्यते मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि॥ सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति॥ अत्र भीताननेति। एतेन हि नीचैः शंसनविधानस्य
युक्ततागम्यते॥ भावादीनां पदप्रकाशत्वेऽधिकं न वैचित्र्यमिति न तदुदाह्रियते॥ अलंकारध्वनेः शब्दश
क्तिमूलानुरणनरूपव्यंग्यस्य पदप्रकाशत्वे उदाहरणं॥ रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः॥
झटिति भ्रुकुटीविटंकितललाटपट्टो विभासि नृपभीम॥ अत्र भीषणस्य भीमसेन उपमानं। भुक्तिमु
क्तिकृदेकांतसमादेशनतत्परः। कस्य नानंदनिष्पंदं विदधाति सदागमः॥ (गिरीगमः) अत्र काचित्संकेतदायिनमेवं मु

रव्ययाद्दत्याशंसति॥ वस्तुध्वनेनार्थशक्तिमूलानुरणनरूपव्यंग्यस्य व्यंजकस्य पदस्य प्रकाश्यते उदाहरणं॥ सायं
स्नानमुपासितं मलयजेनांगं समालिंगितं यातोस्ताचलमौलिमंबरमणिर्विस्रब्धमात्रागतिः। आश्चर्यं तव सौ
कुमार्यमभितः क्लांतासि येनाधुना नेत्रद्वंद्वममीलनव्यतिकरं शक्नोति ते नासितुं॥ अत्र वस्तुना कृतपरपुरु
षपरिचयाक्लांतासीति वस्त्वधुनापदद्योत्यं व्यज्यते॥ विष्णुपुराणे श्लोकद्वयं। तदप्राप्तिमहादुःखविलीना
शेषपातका॥ तच्चिंताविमलाल्हादक्षीणपुण्यचयात्तथा॥ चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं॥ निरुच्छ्वा
सतया मुक्तिं गतान्या गोपकन्यका॥ अत्र जन्मसहस्रैरुपभोक्तव्यानि सुकृतदुःकृतफलानि वियोग
दुःखचिंताल्हादाभ्यां अनुभूतानीत्युक्तं। एवं चाशेषचयशब्दद्योत्योऽतिशयोक्तौ॥ क्षणदासावक्षण
दा वनमवनं व्यसनं मव्यसनं। तव वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखे सर्वं॥ अत्र शक्तिमूलविरोधां
गेनार्थांतरन्यासेन विधिरपि त्वामनुवर्तत इति सर्वपदद्योत्यं वस्तु॥ तुह वल्लहस्स गोसम्मि आसि अहरो मि
लाणकमलदलो। इअ णववहुआ सोऊण कुणइ वअणं महीसमुहं॥ अत्र रूपकेन त्वया अस्य मुहुर्मुहुः परिचुं

तव वल्लभस्य प्रभाते आसीदधरो म्लानकमलदलं। इति नववधूः श्रुत्वा करोति वदनं महीसंमुखं॥

रात्रिषु चंद्रधवलासु ललितमास्फाल्य यश्चायं । एकच्छत्रमिव करोति भुवनराज्यं विजृंभते । विजृंभते कोऽर्थो भणाम ॥

वनं कृतं येन म्लानत्वमिति मिलाणादिपदद्योत्यं काव्यलिंगं । एषु स्वतःसंभवी व्यंजकः ॥ राईसु चंदधवलासु ललिअमफालिऊण जो चावं । एकच्छत्तं विअ कुणइ भुअणरज्जं विअंभंते ॥ अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेशपरान्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशा समयो ऽतिवाह्यत इति पदद्योत्यं वस्तु प्रकाश्यते ॥ निशितशरधियार्पयत्यनंगो दृशि सुदृशः स्वबलं वयस्यराले । दिशि निपतति सा च यत्र व्यतिकरमेत्य समुन्मिषत्यवस्था ॥ अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि भवंतीति व्यतिकरपदद्योत्यो विरोधः ॥ वाहिज्जंतो विपुणा संतावकरंधिएण हियएण ॥ थणभरवअस्सएण विशुद्धजाईण चलइ से हारो ॥ अत्र विशुद्धजातित्वलक्षणहेतुत्वेलं कारेणहारो ऽनवरतं कंपमाण एवास्ते ॥ इति चैन चलतीति पदव्यंग्यं वस्तु ॥ सो मुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो । तीए खंधाउ बलं गहिअ सरो सुरअसंगरे जअइ ॥ अत्र रूपकेन मुहुराकर्षणेन तथा केशपाशः स्कंधयोः प्राप्तो यथा रतिविरतावपि न निवृत्ताभिलाषः कामुको भूदिति स्कंधपदद्योत्या विभावना ॥ एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यंजकः । णवपुण्णिमा मिअंकस्स सुहअ को तं सि भणसु मह

विरज्यमाणेन विभुना संतापकदर्थितेन हृदयेन ॥ स्तनभरवयस्येन विशुद्धजातिर्न चलत्यस्या हारः ॥५ ॥ स मुग्धश्यामलांगो धम्मिल्लः कलितललितनिजदेहः ॥ तस्याः स्कंधाद्बलं गृहीत्वा स्मरः सुरतसंगरे जयति ॥२

नवप्राणिमाम्रगांकस्यसुभगकस्त्वमसिभणममस्यां।कासो[illegible]भाग्यसमयाप्रदोषरजनीतबाध जाता॥१५

४ प्रविशंतीगृहद्वारं विवलितवदनापुरोविलोक्यपंथानं॥स्कंधेकृत्वाघटं हाहानष्टइतिरोदिषिसखिकिं॥४

॥सखिनवनिधुवनसमरेंकपालीसख्यानिविडया॥

॥हारोनिवारितएवउच्छ्रियमाणस्तणकथंरतं॥ २

तच्चं।कासोहगासमहगापञ्जोसरञ्जणिच्चतुहञ्जज्ज॥अत्रवस्तुनामयीवान्यस्यामपिप्रथममनुरक्तत्वं नततइतिनवेत्यादिपञ्जसेत्यादिपदद्योत्यंवस्तुव्यज्यते॥सहिणवणिहुवणसमरंमिञ्जकंपालीसहिएणि विडाए।हारोणिवारिञ्जोच्चिञ्जउच्चेरंतोतदाकहंरमिञ्जं॥अत्रवस्तुनाहारछेदादनंतरंअन्यदेवरतमव श्यमभूत्तत्कथयकीदृगिति॥व्यतिरेकः।कथंपदगम्यः।पविसंतीघरवारंविवलिञ्जवञ्जणापुलोविलोइऊ णपहं।स्कंधेऊणघटंहाहानट्ठोत्तिरुञ्जसिसहिकिंत्ति।अत्रहे[illegible]त्वलंकारेणसंकेतनिकेतनंगच्छंतंप्रियंदृष्ट्वा पदितत्रगंतुमिच्छसितदपरंघटंगृहीत्वागच्छेति॥किंत्तिपदव्यंग्यं।यथावा।विहलंखलंतुञ्जःसहिदट्ठूणघडेण तरलतरदिट्ठी॥वारप्फंसमिसेणअप्पागुरुत्तिपाडिञ्जविभिन्नो॥अत्रनदीकूलेलतागृहे[illegible]कृतसंकेत मप्राप्तंगृहप्रवेशावसरेपश्चादागतंदृष्ट्वापुनर्नदीगमनायद्वारघातव्याजेनबुद्धिपूर्वंव्याकुलयात्वयाघटस्फो टितः।इतिमयाविचिंतितं॥तत्किंनाश्वसिषि॥तत्समीहितसिद्धयेव्रजअहंतेश्वश्रूनिकटेसर्वंसमर्थयिष्ये॥इ तिद्वारस्पर्शमिषेणेतिअपन्हुत्यावस्तु॥जोण्हाएमहुरसेणञ्जविञ्जणतारु[illegible]णजवसुञ्जमसा।सउद्दा

५॥विकलंप्रियंविपत्सुखलंवाप्रियंदृष्ट्वाघटेनोपलक्षितात्वंतरलतरदृष्टिः।

जानेतिविशेषवाक्यंद्वारस्पर्शमिषेणात्मागुरुरितिघटःपातितभिन्नः॥४

ग

(३५)

ज्योत्स्नयाम् अधुरसेन च विस्तीर्णतारुण्योत्सुकमनाः । सा दृष्टापि नवोढेव परवधूः हहहरति नवहृदयं ॥ १

पिनवोढा विअ परवहू हुआ अहह हरइ तुअ अहिअअं । अत्र काव्यलिंगेन दृष्टापरवधूत्वमस्मानुज्झित्वा अभिल
षसीति त्वदीयमाचरितं न शक्यामि त्यक्तुं स्लेषः । परवधूपदप्रकाश्यः । एसु कविनिबद्ध वक्तृप्रौढोक्तिमात्रनिष्पन्न
शरीरः । वाक्यप्रकाश्यस्तु पूर्वमुदाहृतं । शब्दार्थोभयशक्त्युत्थस्तु पदप्रकाश्यो न भवतीति पंचत्रिंशद्भेदाः । प्रबंधे
प्यर्थशक्तिमूला यथा गृध्रगोमायुसंवादे । तथा च । अलं स्थित्वा स्मशानेस्मिन् गृध्रगोमायुसंकुले । कंकालभैरवे
घोरे सर्वप्राणिभयंकरे । न चेह जीवितः कश्चित्कालधर्ममुपागतः । प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥
इति दिवाप्रभावतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनं ॥ आदित्योयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं । बहुविघ्नो
मुहूर्तोयं जीवेदपि कदाचन ॥ अमुं कनकवर्णाभं बालमप्राप्तयौवनं । गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशं
किताः ॥ इति निशि विजृंभमानस्य गोमायोर्जनव्यावर्तनपरमिदं वचनमिति । प्रबंध एव प्रथते ॥ अन्ये ते का
दशभेदा ग्रंथगौरवभयान्नोदाहृताः । स्वयं तु लक्ष्यतोनुसर्तव्याः । अपि शब्दात्पदवाक्ययोः पदैकदेशे रचनाव
र्णेष्वपि रसादयः तत्र प्रकृत्या यथा । रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्स । रुद्दस्स

स

१८

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य । रुद्रस्य तृतीयनयनं पर्वतीपरिचुंबितं जयति ॥ १

तीअ्रणअ्रणपवइपरिचुंविअं जअ्रइ ॥ अत्र जयतीतिनतुशोभत इति आदिसमानेपिहिस्यगनव्यापारे लोकोत्त
रे ऐवस्वरूपेस्यापिधानमिततेदेवो त्कृष्टं ॥ यथा ॥ प्रेयान्सायमपाकृतः सशपथंपादानतः कांतया द्वित्राण्येवपदा
निवासभवनाद्यावन्नयात्युन्मनाः ॥ तावत्प्रत्युतपाणिसंपुटलसन्नीवीनिबंधश्च्युतोधावित्वैव कृतप्रणामक
महोप्रेम्णोविचित्रागतिः ॥ अत्रपत्तानिनतुद्वाराणीति ॥ निम्नुपोयथा ॥ पथिपथिशुकचंचूचारुरंभांकुराणांदिशि
दिशिपवमानोवीरुधांल्लसकश्च ॥ नरिनरिकिरतिद्राक्सायकान्पुष्पधन्वापुरिपुरिविनिवृत्तामानिनीमानच
र्चा ॥ अत्रकिरतीतिकिरणस्यसाध्यमानत्वनिवृत्तेतिवर्तनस्यासिद्धत्वंनिम्नुपाच ॥ तत्रापिक्तप्रत्ययेनातीतत्वंद्योत्य
ते ॥ तथाच ॥ लिखन्नास्तेभूमिंबहिरवनतः प्राणदयितोनिराहाराः सख्यः सततरुदितोच्छूलनयनाः ॥ परित्यक्तंस
र्वंहसितपठितंपंजरशुकैस्तवावस्थाचेयंविसृजकठिनेमानमधुना ॥ अत्रनलिखतीतिअपितुप्रसादपर्यंतं
आस्तइति ॥ तथास्तइतिनत्वासीदिति ॥ भूमिमितिनतुभूमावितिनहिबुद्धिपूर्वकंकिंचिल्लिखतीतितिम्नुपांविभ
क्तीनांव्यंजकत्वं ॥ संबंधस्ययथा ॥ गोमारुहेमिगामेवसामिणअरहुअ्रणंजणामि । णअ्ररिआणंपइयिहरेमिजा

१ = ग्रामोरुहोस्मि ग्रामेवसामिनगरस्थितिंनजानामि । नागरिकाणांपतीन् हरामियाभवामिसाभवामि ॥ १

होमि सा होमि । अत्र नागरिकाणां द्रुतिवष्पाः रमणीयः क्षत्रियकुमार आसीदिति कालस्य । एषा हि मदेन्धरभग्नकार्मु
कं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ॥ वचनस्य यथा ॥ ताण गुणगहणा ताणुकंठाण तस्स पेमस्स । ता[illegible]ण भणि
अण सुंदरि ईरिसं अं जाअमवसाणं ॥ अत्र गुणग्रहादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यते । पुरुषव्यत्ययस्य यथा ॥ रे रे चं
चललोचनांचितरुचे चेतः प्रमुच्य स्थिरं प्रेमाणं महिमान[illegible]मेणनयना मालोक्य किं नृत्यसि । किं मन्ये विहनिष्यसे
वतहतां मुंचांतराशामिमामेषा कंठतटे कृता खलु शिला संसारवारांनिधौ ॥ अत्र प्रहासः । पूर्वनिपातस्य यथा ॥
येषां तेर्बलमेव दुर्बलतया ते संमतास्तैरपि प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः । ये क्ष्माशक्रपु
नः पराक्रमनयस्वीकारकांतक्रमास्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परं ॥ अत्र पराक्रमस्य प्राधा
न्यं गम्यते ॥ विभक्तिविशेषस्य यथा ॥ प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसं ॥ दिवसेन तु नरपभवान
युद्धविधि सिद्धसाधुवादपदं । अत्र दिवसेनेत्यपवर्गे तृतीया फलप्राप्तिं द्यो[illegible]तयति । भूयो भूयः सविधनगरीरथ्यया
पर्यटंतं दृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्था । साक्षात्कामं नवमिव रतिर्मालती माधवं यद्गाढोत्कंठा लुलित

लुलिते रंगके स्ताम्यतीति॥ अत्रानुकंपाद्यर्ते कः तद्धितस्य। परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मि
न्ननुभवपथं यो न गतवान्॥ विवेकप्रध्वंसादुपचित्तमहामोहगहनो विकारः कोप्यंतर्जडयति चतापं च कुरुते॥ अ
त्र प्रशब्दस्योपसर्गस्य। इतं चगर्वाभिमुखं मनस्त्वयाकिमन्यदेवं निहिताश्च नो द्विषः। तमांसि तिष्ठंति हितावदंशुमा
न्नेयावदायादुदयाद्रिमौलितां॥ अन्यत्र तुल्ययोगिताद्योतकस्य चइति निपातस्य। नामोसो भुवनेषु विक्रमगुणैः
प्राप्तः प्रसिद्धिं परामस्माद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तं। वंदीवैषयशांसि गायति मरुद्यस्यैकबाणाह
तिश्रेणीभूतविशालतालविवरो जीर्णैः स्वरैः सप्तभिः। अत्रासावितिभुवनेष्विति गुणैरिति। सर्वनाम[illegible]वचनप्रातिप
दिकवचनानां नत्वदितिनमदिति। अपि तु अस्मदिति सर्वाक्षेपिणः। भाग्यविपर्ययादिति। अन्यथासंपत्तिमुखे
न नत्वभावमुखेनाभिधानस्य। तरुणिमाणि कलयति कलामनुमेदनधनुर्भुवोः पठत्यग्रे॥ अधिवसति सकल
ललनामौलिमियं चकितहरिणनयना॥ अत्रइम इत्यव्ययीभावकर्म[illegible]भूतायाराणां स्वरूपस्य। तरुणत्वेइति
धनुषः समीपे इति मौलौ वसति इत्यत्र त्वादिभिस्तुल्येप्येषां वाचकत्वेऽस्तिकश्चित्स्वरूपस्य विशेषो यश्चमत्कार
कारी स एव व्यंजकत्वं प्राप्नोति। एवमन्येषामपि बोद्धव्यं। वर्णरचनायां व्यंजकत्वं। एतत्स्वरूपनिरूपणे उदाहरि

ष्यते॥ आपिशाद्दास्यं गेषुनाटकादिएवं रसादीनां पूर्वगणितभेदाभ्यां सह षड्भेदाः। भेदास्तदेव पंचाशद्व्याख्याताः।
तेषां चान्योन्ययोजने। संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया। न केवलं शुद्धा एव एकपंचाशद्भेदा भवंति यावत्ते
षां स्वप्रभेदैरेकपंचाशता संशयास्पदत्वेनानुग्राह्यानुग्राहकतया एकव्यंजकानुप्रवेशेन चेति त्रिविधेन संक
रेण परस्परनिरपेक्षरूपया एकप्रकारसंसृष्ट्या चेति चतुर्गुणनेन। वेदखाब्धिवियच्चंद्राः १०४०४ शुद्धभेदैः
सह। शरेषुयुगखेंदवः १०४५५ तत्रादिमात्रमुदाह्रियते॥ खणपाहुणिआ देअर जाआए सुहअ किंपि दे भ
णिआ। स अह्णपडोहरवलहीहरम्मि अणुणिज्जउ वराई॥ अत्रानुनयः किमुपभोगलक्षणेऽर्थांतरे संक्रमितः। कि
मनुरणनन्यायेनोपभोग एव व्यंग्ये व्यंजक इति संदेहः। स्निग्धः श्यामलकांतिलिप्तवियतो वेल्लद्बलाका घना वाताः शी
करिणः पयोदसुहृदामानंदकेकाः कलाः। कामं संतु दृढं कठोरहृदयो रामोस्मि — — सर्वं सहे वैदेहि तु कथं भविष्यति
हहा हा देवि धीरा भव॥ अत्र लिप्तेति पयोदसुहृदामिति चात्यंततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां सह रामोस्मीति
अर्थांतरसंक्रमितवाच्यौ रसध्वन्योः संकरः। एवमन्यदप्युदाहार्यं॥ इति काव्यप्रकाशे ध्वनिनिर्णयो नाम चतुर्थ उल्लासः॥
एवं ध्वनौ निर्णीते गुणीभूतव्यंग्यस्य प्रभेदानाह। अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटं। संदिग्धतुल्यप्राधान्ये

२= स्यानुग्राह्यग्राहकभावेन रामपदलक्षणैकव्यंजकानुप्रवेशेन चार्थांतरसंक्रमितवाच्य=२

कक्कादिमिमसुंदरं । व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदाः स्मृताः । कामिनीकुचकलशवद्गूढं चमत्कारोऽत्यगूढं तु स्फुटतया वाच्य
मानमिति गुणीभूतमेव । अगूढं यथा । यस्याः सुहृत्कृततिरस्कृतिरित्यतन्न स्त्रीव्यधव्यतिकरेण पुनः किं करोमि । कांचीगुणग्रथन
भाजनमेष सोऽस्मि जीवन्न संप्रति भवामि किमावहामि । अत्र जीवन्नित्यर्थांतरसंक्रमितवाच्यस्य । उन्निद्रकोकनदरेणुपिशंगितां
गा गायंति मंजु मधुपा गृहदीर्घिकासु । एतच्चकास्ति च रवेर्नवबंधुजीवपुष्पच्छदाभमुदयाचलचुंबि बिंबं । अत्र चुंबनस्यात्यंततिरस्कृ
तवाच्यस्य । अत्रासीत्फणिपाशबंधनविधिः शक्त्या भवद्देवरो गाढं वक्षसि ताडितो हनुमता द्रोणाद्रिरत्राहृतः । दिव्यैरिंद्रजिदत्र लक्ष्म
णशरैर्लोकांतरं लंभितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कंठाटवी । अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य । तस्याप्यत्रेति
तुल्यकक्षः पाठः । अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्यांगरसादिरनुरणनरूपं च । अयं स रसनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरु
जघनस्पर्शी नीवीविस्रंसनः करः ॥ अत्र शृंगारः करुणस्य । कैलासालयभाललोचनरुचा निर्वर्तितालक्तकव्यक्तिः पादनखद्युति
र्गिरिभुवः सा वः सदा त्रायतां । स्पर्धाबंधसमृद्धयेव सुदृढं रूढा यया नेत्रयोः कांतिः कोकनदानुकारसरसा सद्यः समुत्सार्यते । अत्र भा
वस्य रसः ॥ अत्युच्चाः परितः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती किमपि नश्रांतासि तुभ्यं नमः । आश्चर्येण मु
हुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥ अत्र भूविषयो रत्याख्यो भावो राजविष

दा

यस्य रतिभावस्य। वंदी कृत्सन्नृपद्विषां मृगदृशस्ताः पश्यतां प्रेयसां श्लिष्यंति प्रणमंति लांति परितश्चुंबंति ते सैनिकाः। अस्माकं सुकृतैः
र्दृशो निपतितोस्यो चित्य वारां निधेर्विध्वस्ता विपदोऽखिलास्त्विति तैः प्रत्यर्थिभिः स्तूयते॥ अत्र भावरसाभासभावाभासौ॥ प्रथम
द्वितीयार्धद्योत्यो। अविरलकरवालकंपनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः। ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणात्॥ अत्र भा
वप्रशमः। साकं कुरंगकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते। अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विष
मामकरोदवस्थां॥ अत्र त्रासस्योदयः॥ अस्तोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभेष्वथ च रसिकः शैलदुहितुः॥ प्रमो
दं वो दिश्यात्कपटपटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥ अत्रावेगधैर्ययोः संधिः। पश्येत्कश्चिच्चल चपल रे का
त्वराऽहं कुमारी हस्तालंबं वितर हहहा व्युत्क्रमः क्वासि यासि। इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या कंचित्फलकिस
लयान्यादधानाभिधत्ते॥ अत्र शंकासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता॥ एते च रसवदाद्यलंकाराः॥
यद्यपि भावोदयभावसंधिभावशबलत्वानि नालंकारतयोक्तानि तथापि कश्चिद्ब्रूयादित्येवमुक्तं। यद्यपि स नास्ति कश्चिद्विषयो यत्र
ध्वनिगुणीभूतव्यंग्ययोः स्वप्रभेदादिभिः सह संकरः संसृष्टिर्वा नास्ति तथापि प्राधान्येन व्यपदेशा भवंति क्वचित्केन चिद्व्यवहारः॥
जनस्थाने भ्रांतं कनकमृगतृष्णांधितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितं। कृतालंकाभर्तुर्वदनपरिपाटीषु घटना

२१

(42)

मयात्वं रामत्वं कुशालवसुतान्त्वधिगता ॥ अत्र शब्दशक्तिमूलोऽनुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां नीतः । आ
गत्य संप्रति वियोगविसंष्ठुलांगीमंभोजिनीं क्वचिदपि क्षपितत्रियामः । एतां प्रसादयितुमिति पश्यशनैः प्रभाते तन्वंगिपादपतने
न सहस्ररश्मिः । अत्र नयकष्टतांतोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तांताध्यारोपेणैवस्थितः । वाच्यसिद्ध्यंगं य
था । भ्रमिमरतिमलसहृदयतां प्रलयं मूर्छां तमःशरीरसादं । मरणं च जलदभुजगजं प्रसह्य कुरुते कामिनीनां । अत्र हालाहलं व्यं
ग्यं भुजगरूपणस्य वाच्यस्य सिद्धिकृत् ॥ यथा वा । गच्छाम्यच्युत दर्शनेन भवतः किं प्रीतिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजनः
संभावयत्यन्यथा ॥ इत्यामंत्रणभंगिसूचितरथावस्थानखेदालसामाश्लिष्यन्पुलकोत्करांचिततनुर्गोपीं हरिः पातु वः । संभाव
अत्रा च्युतादिपदव्यंग्यं आमंत्रणेत्यादिसिद्धिकृत ॥ एतच्चैकत्र एकवक्तृगततेनापरत्र भिन्नवक्तृकत्वेनेत्यनयोर्भेदः । अस्फु
टं यथा ॥ अदृष्टे दर्शनोत्कंठा दृष्टे विच्छेदभीरुता । नादृष्टेन न दृष्टेन भवता लभ्यते सुखं । अत्रादृष्टो यथा न भवसि वियोग यं च य
था नोत्पद्यते तथा कुर्या इति क्लिष्टं ॥ संदिग्धतुल्यप्राधान्यं यथा । हरस्तु किंचित्परिवृत्तधैर्यश्चंद्रोदयारंभ इवांबुराशिः ।
उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि । अत्र परिचुंबितुमैच्छदिति किं प्रतीयमाने किं विलोचनव्यापारणं वा
च्यं प्रधानमिति संदेहः ॥ तुल्यप्राधान्यं यथा ॥ ब्राह्मणातिक्रमत्यागो भवतामेव भूतये । जामदग्न्यस्तथा मित्रमन्यथा दुर्मना
यते । अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षणात्क्षयं करिष्यतीति व्यंग्यस्य वाच्यस्य च समं प्राधान्यं । काकाक्षि

रं यथा ॥ मथ्नामि कौरवशतं समरे न रोषाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु
भवतां नृपतिः पणेन ॥ अत्र मथ्नामीवेत्यादिव्यंग्यं वाच्यनिषेधसहभावेन स्थितं। असुंदरं यथा ॥ वाणीरकुडंगुड्डीणसउ
णिकोलाहलं सुणंतीए। घरकम्मवावडाए वहुए सीअंति अंगाणि ॥ अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यात् सीदं
त्यांगानीति वाच्यं चमत्कारं ॥ एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत्। यथायोगमिति। व्यज्यते वस्तुमात्रेण यदलंकृतयस्त
दा ध्रुवं ध्वन्यंगता तासां काव्यवृत्तेस्तदाश्रयात्। इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालंकारा व्यज्यंते न तत्र गुणीभूत
व्यंग्यत्वं। सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः। सालंकारैरिति तैरेवालंकारैः। अलंकारयुक्तैश्चैतैस्तदुक्तं ध्वनिकृता ॥
सगुणीभूतव्यंग्यैः सालंकारैः सह स्वप्रभेदैः स्वैः। संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा इति ॥ अन्योन्ययोगा
देवं स्याद्भेदसंख्यातिभूयसी। एवमिति अनेन प्रकारेणावांतरभेदप्रभेदगणनेन प्रभूततगणना। तथा हि। शृंगारस्यैव
बहुभेदप्रभेदगणनया मानंत्यं का गणना सर्वेषां संकलनेन पुनरस्य ध्वनेस्त्रयो भेदा व्यंग्यस्य त्रिरूपत्वात्। तथा
हि। किंचिद्वाच्यतां सहते किंचित्त्वन्यथा। तत्र वाच्यतासहमविचित्रं विचित्रमिति ॥ अविचित्रं वस्तुमात्रं। विचि
त्रं त्वलंकाररूपं। यद्यपि प्राधान्येन तदलंकार्यं तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसादिलक्षणस्त्वर्थः स्व
प्नेपि न वाच्यः। स हि रसादिशब्देन शृंगारादिशब्देन वाऽभिधीयेत। न चाभिधीयते। तत्प्रयोगे विभावाद्यप्रयो

गे तस्याऽप्रतिपन्नेस्तत्प्रयोगे पितृविभावादिप्रयोगे प्रतिपन्नेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव
प्रतीयते। इति निश्चीयते। तेनासौ व्यंग्य एवा। मुख्यार्थबाधाद्यभावान्न पुनर्लक्षणीयः। अर्थांतरसंक्रमिता
त्यंततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यंग्यं विना लक्षणैव न भवति। इति प्राक्प्रतिपादितं। शब्दशक्तिमूलेतु
नियंत्रणेनाऽनभिधेयस्यार्थांतरस्यतेन सहोपमादेरलंकारस्य निर्विवादं व्यंग्यत्वं। अर्थशक्तिमूलेपि विशेषे
संकेतः कर्तुं न युज्यत इति। सामान्यरूपाणां पदार्थानां आकांक्षासंन्निधानयोग्यतावशात्परस्परं संसर्गे यत्रापरा
र्थो विशेषरूपो वाक्यार्थः। तत्राभिहितान्वयवादेका वार्त्ता व्यंग्यस्याभिहितायां। यथाहुः। शब्दवृद्धाभिधेयांश्च
प्रत्यक्षेणात्र पश्यति। श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया। अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकां।।
अर्थापत्त्यैव बुध्नाति संबंधं त्रिप्रमाणकमिति प्रतिपादितदिशा बरोयं देवदत्त गामानय इत्याद्युत्तमवृद्धवाक्य
प्रयोगे देशाद्देशांतरं सास्नादिमंतमर्थं मध्यमवृद्धेनयति सत्यनेनास्मद्वाक्यादेवंविधोर्थः प्रतिपन्न इति त
च्चेष्टयानुमानतयाखंडवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणसंबंधमवधार्य बालस्तत्र व्युत्पद्य
ते। पश्चाच्चैत्र गामानय देवदत्त अश्वमानय देवदत्त गामानयेत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमव

धारयतीति। अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारिवाक्यमेव प्रयोगयोग्यमिवाक्यस्थितानामेव पदाना
मन्वितैः पदार्थैरन्वितानामेव संकेतो गृह्यते। इति विशिष्टा एव पदार्था वाक्यार्थो न तु पदार्थानां वैशिष्ट्यं। यद्यपि
वाक्यांतरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानि निश्चीयंते इति पदार्थांतरमात्रेणान्वि
तः पदार्थः संकेतगोचरस्तथापि सामान्याच्छादितो विशेषरूप एवासौ प्रतिपाद्यते। व्यतिरिक्तानां पदार्थानांत
आनन्त्यादित्यन्विताभिधानवादिनः। तेषामपि मते सामान्यविशेषरूपः पदार्थः संकेतविषय इत्यभिध्यातिविशेष
रूपो वाक्यार्थांतर्गतोऽसंकेतितत्वादवाच्य एवं यत्र पदार्थः प्रतिपद्यते तत्र दूरेऽर्थांतरभूतस्य निःशेषच्युते
त्यादेर्विधादेस्यर्थः। अनन्वितोऽर्थोऽभिहितान्वये पदार्थांतरमात्रेणान्वितस्त्वन्विताभिधाने। अन्विताभिधाने वि
शेषस्त्ववाच्य एवेत्युभयमतेऽपि पदार्थ एव वाक्यार्थः। यदप्युच्यते नैमित्तिकानुसारेण निमित्तानि कल्प्यंत इति
तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा। शब्दस्य प्रकाशकत्वान्न कारकत्वं। ज्ञापकत्वं तु ज्ञातस्य कथं ज्ञातत्वं तु सं
केतेनैव तच्चान्वितमात्रे। एवं च निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति
नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यंत इति व्यभिचारिताभिधानं। ये ऽप्यत्र भिदधौ तिसाय मितरयोरिवदी

घेदीर्घोभिधाव्यापार इतियत्परःशब्दःसशब्दार्थ इति विधिरेवात्रवाच्य इति तेतावदतात्पर्यज्ञाः तात्पर्यवाचोयुक्ते
देवानांप्रियाः ॥ तथाहि । भूतभव्यसमुच्चारणे भूतंभव्यायोपदिश्यत इति । कारकपदार्थाः क्रियापदार्थेनान्वी
यमानाः प्रधानक्रियाभिनिर्वर्तकस्वक्रियाभिसंबंधात्साध्यायमानतां प्रपद्यंते ॥ ततश्चादग्धदहनन्यायेन
यावदप्राप्तं तावद्विधीयते । यथा ॥ ऋत्विक्प्रचरणे प्रमाणांतरात्सिद्धे लोहितोष्णीषा ऋत्विजः प्रचरंती
त्यत्र लोहितोष्णीषत्वमात्रं विधेयं । हवनस्यान्यतः सिद्धेर्दध्नाजुहोतीत्यादौ दध्यादेः करणत्वमात्रं विधेयं ॥ क
चिदुभयविधिः । क्वचित्त्रिविधिरपि यथा रक्तंपटंवयेत्यादौ एकद्वित्रिविधिर्वा ॥ ततश्च यदेवविधेयं तत्रैवतात्प
र्यमित्युपात्तस्यैवशब्दस्यार्थे तात्पर्यं नतु प्रतीतमात्रे । एवंहि पूर्वोधावतीत्यादावपराद्यर्थेपि कृ
तात्पर्यं स्यात् । यत्तु विषं [illegible] भक्षय माचास्य गृहे भुंक्था इत्यत्र एतद्गृहे न भोक्तव्यमित्यत्र तात्पर्यमिति स
एववाक्यार्थ इत्युच्यते । तत्र चकार एकवाक्यतासूचनार्थः ॥ नचाख्यातवाक्ययोर्द्वयोरंगांगिभाव इति वि
षभक्षणवाक्यस्य सुहृद्वाक्येनांगताकल्पनीयेति विषभक्षणादपि दुष्टमेतद्गृहे भोजनमिति सर्वथा मास्य
गृहे भुंक्था इत्युपात्तएवशब्दार्थे । तात्पर्यं । यदि च शब्दश्रुतेरनंतरं यावानर्थोवगम्यते तावति शब्दस्या

भिधैव व्यापारस्तत्कथं ब्राह्मणपुत्रस्ते जातो ब्राह्मणकन्या ते गर्भिणीत्यादौ हर्षशोकादीनामपि न वाच्यत्वं॥
कस्माच्च लक्षणा लक्षणीयेप्यर्थे दीर्घदीर्घाभिधाव्यापारेणैव प्रतीतिसिद्धेः॥ किमिति च श्रुतिलिंगवाक्य
प्रकरणसमाख्यानां पूर्वपूर्वबलीयस्त्वं इत्यन्विताभिधानवादे विधेरपि सिद्धं व्यंग्यत्वं॥ किंच कुरु रुचिमिति
पदयोर्वैपरीत्ये घंतवेत्तिनि कथं दुष्टत्वं। नह्यत्रासभ्योर्थः पदार्थान्तरैरन्वित इत्यनभिधेय एवेत्येवमादिष्वपरि
साधुत्वं स्यात्। यदि च वाच्यवाचकभावव्यतिरेकेण व्यंग्यव्यंजकभावो नाभ्युपेयते तदासाधुत्वादीनां नित्य
दोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात्। न चानुपपन्नं। सर्वस्यैव विभक्ततया प्र
तिभासात्। वाच्यवाचकभावव्यतिरेकेन व्यंग्यव्यंजकताश्रयणे तु व्यंग्यस्य बहुविधत्वात्। क्वचिदेव कस्यचिदे
वौचित्येनोपपद्यत एवं विभागव्यवस्था द्वयं गतं संप्रति शोचनीयतां सामागमप्रार्थनया कपालिन इत्यादौ
पिनाक्यादिवैलक्षण्येन किमिति कपाल्यादिपदानां काव्यानुगुणत्वं। अपि च। वाच्योर्थः सर्वान् प्रतिपत्त
न्प्रत्येकरूप एवेति नियतोसौ। न हि गतोस्तमर्क इत्यादौ वाच्योर्थः क्वचिदन्यथा भवति। प्रतीयमानस्तु तत्तत्प्र
करणवक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते। तथा च। गतोस्तमर्क इत्यतः सपत्नं प्रत्यवस्कंदन

२५

टीका

वसरइति।अभिसरणमुपक्रम्यतामिति।प्राम:प्रायस्ते प्रेयानिति।कर्मेकरणानिहन्तामदइति।संध्यावधिरूपक्र
म्यतामिति॥इरंमागाइति॥सुरभयोगृहंप्रवेश्यंतामिति।संतापोधुनानभवतीति।कुयवस्त्रानिसंह्रियतामि
ति।नागतोघप्रेयाम्भिनिस्पनवधिव्यंग्यार्थस्तत्रतत्रप्रतिभाति॥क्वचिद्वाच्यव्यंग्ययोर्निःशेषेत्यादौनिषेधविध्यात्मना॥
मात्सर्यमुत्सार्यविचार्यमार्या:समर्यादमुदाहरंतु।सेव्यानितंबाःकिमुभूधराणांकुमुस्मरस्मेरविलासिनीनां॥इत्यादौ
संशयेशांतश्रृंगारान्यतरगतनिश्चयरूपेण।कथमवनिपदर्पोयन्निशातासिधारादलनगलितमूर्धांविद्विषांस्वी
कृतश्री:नतुतवनिशातारेरप्यसौकिंननीतात्रिदिवमपगतांगैर्वल्लभाकीर्तिरेभि:।इत्यादौनिंदास्तुतिवपुषास्व
रूपस्य॥एवंपक्षाभावेनप्रतीते:कालस्याशब्दाश्रयत्वेनशब्दस्यशब्देकदेशतदर्थवर्णसंघाताश्रयत्वेनवाश्रयस्य
शब्दानुशासनज्ञानेनप्रकरणादिसहायप्रतिभानैर्मल्यसहितेनतेनवावगमइतिनिमित्तस्यावोद्धमात्रविद
ग्धव्यपदेश्ययो:प्रतीतिमात्रचमत्कृत्यो:करणात्कार्यस्य।गतोस्तमर्कइत्यादौप्रदर्शितनयेनसंख्याया:॥कस्सव
णहोइरोसोदट्ठूणपिआएसव्वणंअहरं।सभमरपउमग्धाइविवारिअवामेसहसुएह्णि।इत्यादौसखीतत्कां
तादिगतत्वेनविषयस्यभेदेपि।यद्येकत्वंतत्काचिदपिनीलानीत्यादौभेदोनस्यात्।उक्तंहि॥अयमेवहिभेदोभे

देहेतुर्वीयद्वित्वद्धर्माध्यासः कारणभेदश्चेति। वाचकानामर्थापेक्षा॰ व्यंजकानां तु न तदपेक्षत्वमपीति न वाचक
त्वमेव व्यंजकत्वं किंच वाणी रखुरंगे त्यादौ प्रतीयमानमर्थमभिव्याप्य वाच्यस्वरूप एव यत्र विश्राम्यति तत्र
गुणीभूतव्यंग्येऽतात्पर्येभूतोप्यर्थः। स्वशब्दानभिधेयः प्रतीतिपथमवतरन्कस्य व्यापारस्य विषयतामवलंबतां॥
ननु रामोऽस्मि सर्वं सहे इति। रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये णोचितमिति। रामोसौ भुवनेषु विक्रमगुणैः प्रा
तः प्रसिद्धिं परामित्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते। विशेषव्यपदेशहेतुश्च भवति। तदर्थावगमश्च शब्दार्था
यत्तः प्रकरणादिसव्यपेक्षश्चेति कोयं नूतनः प्रतीयमानो नाम उच्यते। लक्षणीयस्यार्थस्य नानात्वेप्यनेकार्थश
ब्दाभिधेयवन्नियतत्वमेव। न खलु मुख्येनार्थेनानियतसंबंधो लक्षयितुं शक्यते। प्रतीयमानस्तु प्रकरणादि
विशेषवशेन नियतसंबंधोऽनियतसंबंधः संबद्धसंबंधश्च द्योत्यते। न च। अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं
पुलोएहि। मा पहिअ रत्तिअंधअ सज्जाए मह णिमज्जिहिसी त्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाध
स्तत्कथमत्र लक्षणा। लक्षणीयेप्यर्थे व्यंजनमवश्यमाश्रयितव्यमिति प्रतिपादितं। यथा च समयसव्यपेक्षा याद्दि
प्रेयानित्यादिरनवधिर्व्यंग्योर्यस्तत्र तत्र प्रतिभाति। वाच्यव्यंग्ययोर्निःशेषेत्यादौ निषेधविध्यात्मना मात्सर्यमुत्सा

येविचार्यमार्यसमर्यादमुत्तरंतु सेव्यानितंबाः खलु भूधराणां किमु स्मरस्मेरविलासिनीनामित्यादौ संशयगोचरस्थमा
र्यन्यतरगतानितंबाः श्रयरूपेण । कथमवनिपदर्पो यन्निशातासिधारादमलनगलितमूर्द्धा विद्विषां स्वीकृता श्रीः न
नुतवनिस्तारोप्यसौ किं त्वनीता त्रिदिवमपगतांगैर्वल्लभा कीर्तिरेभिरित्यादौ नंदस्तुतिवपुषा स्वरूपस्य पूर्वपश्चा
द्भावेन प्रतीतेः कालस्य । राअसञ्चं पुलोपहिमापहिट्ठिनाआरत्ति अंधिअ असेजा पमरुनुमज्जिहिसि । इत्यादौ वि
वक्षितान्यपरवाच्ये ध्वनौ न मुख्यार्थबाधस्तत्कथमत्र लक्षणा लक्षणामपि व्यंजनमवश्यमाश्रयितव्यमिति प्र
तिपादितं ॥ यथा च समयसव्यपेक्षाभिधा तथा मुख्यार्थबाधादित्रयसमयविशेषसव्यपेक्षा लक्षणा । अत एव चाभि
अत एवाभिधापुच्छभूता सत्याहुः । न च लक्षणात्मकमेव ध्वननं । तदनुगमेनास्य दर्शनात् । न च तदनुगतत्वमेवात्र
भिधावत्त्वं वने नापितस्य वाच्य चोभयानुसार्येव । अवाच वर्णानुसारेणापि तस्य दृष्टेः । न च शब्दानुसार्येव । अशब्दा
त्मकेनेत्र त्रिभागावलोकनादिगतेनापि तस्य सिद्धेः । इत्यभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वन
नादिपर्यायो व्यापारोऽनपन्हवनीय एव । अत एव हि त्थेत्यादौ नियतसंबंधः । कस्त्वं वणदोह इत्यादौ वानियतसं
बंधः । विवरीअरए लच्छीव म्हदव्वूण णाहिकमलत्थं हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ । इत्यादौ सं

५७

वत्संबंधः। अत्र द्विहपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते। तन्निमीलनेन सूर्यास्तमयस्तेन पद्मस्य संकोचस्ततो
ब्रह्मणः स्थानं। तत्र सति गोप्यांगस्यादर्शनेनानियंत्रणं निधुवनविलसितमिति॥ अत्र खंडबुद्धिनिग्राह्यो वाक्या
र्थ एव वाच्यो वाक्यमेव वाचकमिति येप्याहुस्तैरप्यविद्यापथपतितैः पदपदार्थकल्पना कर्त्तव्यैवेति तत्पक्षेप्यव
यमुक्तोदाहरणादौ विद्यादिव्यंग्य एवानन्नुवाच्यादसंबद्धं तावन्न प्रतीयते। यतः कुतश्चिद्यस्य कस्यचिदर्थस्य
प्रतीतेः प्रसंगात्। एवं च संबंधाद्व्यंग्यव्यंजकभावोऽप्रतिबंधेऽवश्यं न भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वे
न च त्रिरूपलिंगाल्लिंगिनि ज्ञानमनुमानं यत्तद्रूपपर्यवस्यति। तथाहि। भमधम्मिअ वीसद्धो सो सुणओ अ
ज्ज मारिओ देण। गोलाणकच्छकुडंगवासिणा दरिअसीहेण॥ अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं। गोदावरी
तीरे सिंहोपलब्धेरभ्रमणमनुमापयति। यद्यभीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकं। गोदावरीतीरे च
सिंहोपलब्धिरिति। व्यापकविरुद्धोपलब्धिः॥ अत्रोच्यते। भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेणान्येन चैवं
भूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकांतिको हेतुः। शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोपि गो
दावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितोपि तु वचनात्। न च वचनस्य प्रामाण्यमस्त्यर्थेनापि प्रतिबंधा

दित्यसिद्धः। तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः। तथा निःशेषच्यु[illegible]तेत्यादौ गमकतया यानि चंदनच्यवना
दीन्युपात्तानि तानि कारणांतरैरतोपि भवंति। अतश्चात्र वस्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानीत्या
नैकांतिकानि। व्यक्तिवादिना चाधमपदसहायानामेषां व्यंजकत्वमुक्तं न चात्राधमत्वं प्रमाणप्रतिपन्नमिति
कथमनुमानं। एवंविधादर्थादेवंविधोर्थ उपपत्त्यनपेक्षत्वेपि प्रकाशत इति व्यक्तिवादिनः पुनस्तद्दूषणं॥
इति श्रीकाव्यप्रकाशे ध्वनिगुणीभूतव्यंग्यसंकीर्णभेदनिर्णयो नाम पंचम उल्लासः॥ ॥शब्दार्थचित्रं
यत्पूर्वं काव्यद्वयमुदाहृतं। गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः॥ न तु शब्दचित्रे अर्थस्याचित्रत्वं अर्थचित्रे वा
शब्दस्य। तथा चोक्तं। रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः। न कांतमपि निर्भूषं विभाति वनिताननं। रूपकादि
मलंकारं बाह्यमाचक्षते परे। सुपां तिङां च व्युत्पत्तिं वाचां वांछंत्यलंकृतिं। तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्ति
रीदृशी॥ शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः इति। शब्दचित्रं यथा॥ प्रथममरुणच्छायस्तावत्ततः कनक
प्रभस्तदनु विरहोत्ताम्यत्तन्वीकपोलद्युतिः। उदयति ततो ध्वांतध्वंसक्षमः क्षणदामुखे सरसबिसिनीकंदच्छे
दच्छविर्मृगलांछनः॥ अर्थचित्रं यथा॥ ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खला

स्थानीवाः स देवस विलासमलीकलज्जायेकात्तत्तांकुटिलतांमिवनत्यजोति। यद्यपि सर्वत्र काव्येंतातो विभावा
दिरूपतयारसपर्यवसानंतथापिस्फुटस्य रसस्यानुपलंभादव्यंग्यमेतत्काव्यद्वयमुक्तं। अस्य च शब्दार्थालंकारभे
दाद्बहवो भेदाः सन्ति ते चालंकारनिर्णये निर्णेष्यंते॥ इति काव्यप्रकाशे षष्ठउल्लासः॥ ॥काव्यस्वरूपं नि
रूप्य दोषाणां सामान्यलक्षणमाह। मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः। उभयोपयोगिनः स्युः
शब्दाद्यास्तेन तेष्वपि सः। हतिरपकर्षः। शब्दाद्या इत्याद्यग्रहणाद्वर्णरचने विशेषलक्षणमाह। दुष्टं पदं श्रु
तिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थं। निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलं। संदिग्धमप्र
तीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टं। अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव। श्रुतिकटु परुष
वर्णमयं यथा। अनंगमंगलगृहापांगभंगितरंगितैः। आलिंगितः स तन्वंग्या कार्त्तार्थ्यं लभते कदा। अत्र कार्ता
र्थ्यमिति। च्युतसंस्कृति व्याकरणलक्षणहीनं। यथा। एतन्मंदविपक्वतिंदुकफलश्यामोदरापांडुरप्रांते हंत
पुलिंदसुंदरकरस्पर्शक्षमं लक्ष्यते। तत्पल्लीपतिपुत्रि कुंजरकुलं कुंभाभयाभ्यर्थनादीनं त्वामनुनाथते कुच
युगं पत्रावृतं मा कृथा। अत्रानुनाथत इति सर्पिषो नाथत इत्यादावाशिष्येव नाथतेरात्मनेपदं हि नियतमि

तं त्राशिषि नाथ इति। अत्र तु याचनार्थस्तस्मान्नाथतिस्त्वमे ति पठनीयं। अप्रयुक्तं तथाम्नातमपि कविभिर्ना
दृतं। यथा। यथायं दारुणाचारः सर्वदैव विभाव्यते। तथा मन्ये दैवतोस्य पिशाचो राक्षसोथवा। अत्र दैवतशब्दो
दैवतानि पुंसि वेत्याम्नातोपि न केनचित्प्रयुज्यते। असमर्थं। यदर्थं पठ्यते न च तत्रास्य शक्तिः। यथा। तीर्थांतरेषु
स्नानेन समुपार्जितसत्कृतिः। सुरस्रोतस्विनीमेष हंति संप्रति सादरं। अत्र हंतीति गमनार्थं। निहतार्थं। य
दुभयार्थमप्रसिद्धार्थे प्रयुक्तं। यथा। यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन। मुग्धा साध्वसतरला विलो
क्य परिरभ्य चुंबिता सहसा॥ अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्वलीकृतरूपोर्थो व्यवधीयते। अनुचि
तार्थं यथा। तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या। प्रयांति तामाशु गतिं यशस्विनो रणाश्व
मेधे पशुतामुपागताः॥ अत्र पशुपदं कातरतामभिव्यनक्तीत्यनुचितार्थं। निरर्थकं। पूरणमात्रप्रयोजनं
चादिपदं। यथा। उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि। अभिवांछितं प्रसिध्यतु भगवति युष्मत्प्र
सादेन॥ अत्र हिशब्दः॥ अवाचकं यथा॥ अवंध्यकोपस्य विहंतुरापदं भवंति वश्याः स्वयमेव देहिनः॥ अमर्षशून्ये
न जनेस्य जंतुना न जातहार्देन न विद्विषादरः॥ अत्र जंतुपदमदातर्यर्थे विवक्षितं तत्तच्च नाभिधायकं। यथा वा॥

त

हाधिक्साकिलतामसीशशिमुखीदृष्टामयायत्रसातद्विच्छेदरुजांधकारितमिदंदग्धंदिनंकल्पितं।किंकुर्मःकु
शलेसदैवविधुरोधातानचैत्कथंताहग्यामवतीमयोभवतिमेनोजीवलोकेधुना॥अत्रदिनमितिप्रकाशमयमि
त्यत्रार्थेऽवाचकं।यत्रोपसर्गसंसर्गादर्थांतरंगते।यथा।जंघाकांडोरुनालोनखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयोमंजुमंजीरभृंगः॥भर्तुर्नृत्यानुकारेजयतिनिजतनुस्वच्छलावण्यवापी
संभूतांभोजशोभांविदधदभिनवोदंडपादोभवान्याः॥अत्रदधदित्यत्रार्थेविदधदिति।त्रिधेति।व्रीडाजुगुप्सा
ऽमंगलव्यंजकत्वात्।यथा।साधनंसुमहद्यस्ययत्रान्यस्यविलोक्यते।तस्यधीशालिनःकोन्यःसहेताराळितांभ्रु
वं॥लीलातामरसाहतोन्यवनितानिःशंकदष्टाधरःकश्चित्केसरदूषितेक्षणइवव्यामील्यनेत्रेस्थितः।मुग्धाकु
ड्मलिताननेनददतीवायुंस्थितातस्यसाभ्रांत्याधूर्ततयाथवानतिमृतेतेनानिशंचुंबिता॥मृदुपवनविभि
न्नोमत्प्रियायाविनाशात्घनरुचिरकलापोनिःसपत्नोद्यजातः।रतिविगलितबंधेकेशपाशेप्रियायाःसतिकु
सुमसनाथेकंहरेदेषबर्ही।एषुसाधनवायुविनाशशब्दाः।व्रीडाद्यभिव्यंजकाः॥संदिग्धंयथा।आलिंगितस्तत्र
भवान्संपरायेजयश्रिया॥आशीःपरंपरांवंद्यांकर्णेकृत्वाकृपांकुरु।अत्रवंद्यामादवगृहीतमहिलायांकिंवान

२८

मस्यामीति संदेहः। अत्र प्रतीतं यत्केवलं शास्त्रे प्रसिद्धं यथा। सम्यक्ज्ञानमहाज्योतिर्दलिताशयताजुषः। वि
धीयमानमप्येतन्न भवेत्कर्मबंधनं। अत्राशयशब्दो वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः। ग्राम्यं केव
ले लोके स्थितं यथा। राकाविभावरीकांतसंक्रांतद्युति ते मुखं। तपनीयशिलाशोभा कटिश्च हरते मनः। अत्र क
टिरिति। नेयार्थं। काश्चिन्नैव त्वशक्तित इति यन्निषिद्धं लाक्षणिकं। यथा। शरत्कालसमुल्लासिपूर्णिमाशर्वरी
प्रियं। करोति ते मुखं तन्वि चपेटापातनातिथिं॥ अत्र चपेटापातनेनेति निर्जितत्वं लक्ष्यते। अथ समासगतमेव दु
ष्टमिति संबंधः। अन्यत्तु केवलं समासगतं च क्लिष्टं। यतोऽर्थप्रतिपत्तिर्व्यवहिता। यथा। अत्रिलोचनसंभूतज्यो
तिरुद्गमभासिभिः। सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितं। अत्रिलोचनसंभूतं चंद्रस्य ज्योतिरुद्गमभासिभिः
कुमुदैरित्यर्थः॥ अविमृष्टविधेयांशं। प्राधान्येनानिर्दिष्टो विधेयांशो यत्र। तद्यथा। मूर्ध्नामुद्वृत्तकृत्ताविरलग
लगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नां। कैलासोल्लासनेच्छाव्यति
करपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः। अत्र मिथ्यामहिमत्वं
नानुवाद्यं। अपि तु विधेयं। यथा च। स्रस्तां नितंबादवलंबमानां पुनः पुनः केसरदामकांचीं। न्यासीकृतां स्था

नवितास्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥ अत्र मौर्वीं द्वितीयामिति द्वितीयत्वमात्रमुत्प्रेक्ष्यं ॥ यथा च ॥ वपुर्विरूपाक्षमलक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु । वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥ अत्रालक्ष्यता जनिरिति वाच्यं ॥ यथा च ॥ आनंदसिंधुरतिचापलशालिचित्तसंदानैकसदनं क्षणमप्यमुक्ता ॥ या सर्वदैव भवता तदुदंतचिंता तां तिं तनोति तव संप्रति धिग्धिगस्मान् ॥ अत्र न मुक्तेति निषेधो विधेयः ॥ यथा ॥ नवजलधरः संनद्धोयं न दृप्तनिशाचरः सुरधनुरिदं दूराकृष्टं न तस्य शरासनं । अयमपि पटुर्धारासारो न बाणपरंपरा कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥ इत्यत्र ॥ न त्वमुक्तानुवादेनान्यदत्र किंचिद्विहितं ॥ यथा ॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः । अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥ अत्रात्रस्ततादि अनुवादेनात्मनो गोपनादि विरुद्धमतिकृत ॥ यथा ॥ सुधाकरकराकारविशारदविचेष्टितैः । अकार्यमित्रमेकोसौ तस्य किं वर्णयामहे ॥ अत्र कार्यं विना मित्रमिति विवक्षितं । अकार्ये मित्रमिति तु विरुद्धमती[illegible]तिः ॥ यथा वा ॥ चिरकालपरिप्राप्तिलोचनानंददायिनः । कांता कांतस्य सहसा विदधाति गलग्रहं ॥ अत्र कंठग्रहमिति वाच्यं ॥ तथा ॥ न त्रस्तं यदि नाम भूतकरुणासंतानशांतात्मनस्तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः ॥

तत्पुत्रस्तुमदांधतारकवधाद्विश्वस्यदत्तोत्सवःस्कंदःस्कंदइवप्रियोहमथवाशिष्यःकथंविस्मृतः।अत्रभवानीपति
शब्दोभवान्याःपत्यंतरप्रतीतिंकरोति॥यथावा॥गौरापियद्वाहनतांप्रपन्नवतःसोपिगिरिसुतासिंहः।सविधेनिर
हंकारःपायाद्वःसोविकारमृगः॥इतिविरुद्धाधियमुत्पादयति॥श्रुतिकटुसमासगतंवा॥यथा॥सादूरेचसुधा
सांद्रतरंगितविलोचना।वहिनिर्ह्रादनार्होयंकालश्चसमुपागतः।एवमन्यदपिज्ञेयं॥अपास्यच्युतसंस्कारमसमर्थ
निरर्थकं।वाक्येपिदोषाःसंत्येतेपदस्यांशेपिकेचन।केचननपुनःसर्वे।क्रमेणोदाहरणानि।श्रुतिकटु।सोध्यै
ष्टवेदांस्त्रिदशानयष्टपितॄनतार्प्सीत्सममंस्तबंधून्।व्यजेष्टषड्वर्गमरंस्तनीतौसमूलघातंन्यवधीदरींश्च॥अ
प्रयुक्तं।सपातुदेवोदुग्धवनोभावुकानांपरंपरा।अनेडमूकताद्यैश्चद्यतुदोषैरसंमतान्॥अत्रदुग्धवनदैः
अनेडमूकोमूकवधिरः॥निहतार्थं।सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः।अब्जरुचिभा
स्वरास्तेभातितरामवनिपश्लोकः॥अत्रसायकादयःशब्दाःखड्गाद्यभिभूतचंद्रपर्यायाःशराद्यर्थतयाप्रसिद्धाः
नावत् अनुचितार्थं।कुविंदस्त्वंपटयसिगुणग्राममभितोयशोगायंत्येतेदिशिदिशिचनग्नास्तवविभो।शरज्ज्योत्स्नागौ
रस्फुटविकटसर्वांगसुभगातथापित्वत्कीर्तिर्भ्रमतिविगताच्छादनमिह।अत्रकुविंदादिशब्दोर्थांतरप्रति

(बन्दिनः)

पादस्यानुपश्लोक्यमानस्यातिरस्कारं व्यनक्तीत्यनुचितार्थः। अवाचकं॥ प्राभ्रभ्राड्विष्णुधामाप्य विषमाश्वः करोत्य
यं। निद्रां सहस्रपर्णानां पलायनपरायणां। अत्र प्राभ्रविष्णुधामविषमाश्वनिद्रापलायनशब्दाः प्रकृष्टजलदगगन
समाश्वसंकोचपलायनमवाचकाः॥ त्रिधाश्लीलं॥ नृपतेरुपसर्पंती कंपना वामलोचना। तत्तत्प्रहरणोत्साह
वती मोहनमादधौ। अत्रोपसर्पणप्रहरणमोहनशब्दा व्रीडादायित्वादश्लीलाः॥ तेन्यैर्वांतं समश्नंति परो
त्सर्गं च भुंजते। इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्तनं॥ अत्र वांतोत्सर्गप्रवर्तनशब्दाः जुगुप्सादायिनः॥
पितृवसतिमहं व्रजामि तां सहपरिवारजनेन यत्र मे। भवति सपदि याचकान्वये हृदयमशोषितशोकशल्य
कं॥ अत्र पितृगृहमित्यादौ विवक्षिते श्मशानादिप्रतीतिरित्यमंगलार्थत्वं। संदिग्धं। सुरालयोल्लासपरः प्राप्त
पर्याप्तकंपनः। मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यतां॥ अत्र सुरादिशब्दाः किं देवसेनाशरविभूत्यर्थाः
किं मदिराद्यर्था इति संदेहः॥ अप्रतीतं। तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः। दृढभूमिः प्रियप्राप्तौ य
त्नः स फलितः सखे। अत्राधिमात्रोपायादयः शब्दा योगशास्त्रमात्रप्रयुक्तत्वादप्रतीताः। ग्राम्यं। तांबूल
भृतगल्लोयं भल्लं जल्पति मानुषः। करोति खादनं पानं सदैव तु यथा तथा॥ अत्र गल्लादयः शब्दा ग्राम्याः।

सेना

नेयार्थो॥ वस्त्रे वैडूर्यचरणैः क्षतसत्वरजः परा। निष्कृपा रचिता नेत्रयुग्मं बोधय सांप्रतं। अत्रां बररत्नपदैः निर्दिष्टतमा अच्लाभूः कृत्वा नेत्रद्वंद्वं बोधयेति नेयार्थता॥ क्लिष्टं। धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरंगशावाक्ष्याः। रज्यत्यपूर्वबंधव्युत्पत्तेर्मानसं शोभां॥ अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति संबंधे क्लिष्टत्वं। अविमृष्टविधेयांशं॥ न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोऽप्यत्रैव निहंति राक्षसकुलं जीवत्यहो रावणः। धिग्धिक् शक्रजितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः किमेभिर्भुजैः॥ अत्रायमेव न्यक्कार इति वाच्यं। उच्छूनत्वमात्रं त्वनुवाद्यं न वृथात्वं विशेषितं॥ अत्र शब्दरचना विपरीता कृतेति वाक्यस्यैव दोषो न वाक्यार्थस्य यथा वा। अपांगसंसर्गितरंगितं दृशो भ्रुवोररालांतविलासि वेल्लनं। विसारि रोमांचनकंचुकं तनोस्तनोति योऽसौ सुभगे तवागतः। अत्र योऽसाविति पदद्वयमनुवाद्यविधेयार्थतया विवक्षितमनुद्यमानत्वं प्रतीति कृतं॥ तथा हि। प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्द[illegible]सेपानपेक्षते॥ क्रमेणोदाहरणानि॥ कातर्यं केवलानीतिः शौर्यं श्वापदचेष्टितं। अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः॥ द्वयं गतं संप्रति शोचनीयतां समागम[illegible]प्रार्थनया कपालिनः। कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥ ८

67

त्कंपिनी भयपरिस्खलितांशुकांतां ते लोचने प्रतिदिशं विधुरे क्षिपंती। क्रूरेण दारुणतया सहसैव दग्धा धूमान्धि
तेन दहनेन न वीक्षितासि। यच्छब्दस्तत्र वाक्यार्थगतत्वेनोपात्तः सामर्थ्यात्तच्छब्दवाच्यार्थगस्य तच्छब्दस्योपादा
नं नापेक्षते। यथा। साधु चंद्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके। उद्यता जयिनि कामिनीमुखे ते
न साहसमनुष्ठितं पुनः। प्रागुपात्तस्तु यच्छब्दस्तच्छब्दोपादानं विना साकांक्षः॥ यथात्रैव श्लोके आद्यपा
दयोर्व्यत्यासे द्वयोरुपादाने तु निराकांक्षत्वं प्रसिद्धं। अनुपादाने तु द्वयमपि सामर्थ्यात्क्वचिद्गम्यते। यथा॥
ये नाम केचिदिह नः प्रथयंत्यवज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः॥ उत्पत्स्यते ऽस्ति मम कोपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ अत्र य उत्पत्स्यते तं प्रतीति। एवं तच्छब्दानुपादाने तत्र साकांक्षत्वं॥
न चासाविति तच्छब्दार्थमाह॥ असौ मरुच्चुंबितचारुकेसरः प्रसन्नताराधिपमंडलाग्रणीः। वियुक्तरामातु
रदृष्टिवीक्षितो वसंतकालो हनुमानिवागतः। अत्र न हि तच्छब्दार्थप्रतीतिः। प्रतीतौ वा। करवालकरालदोः
सहायो युधि योसौ विजयार्जुनैकमल्लः। यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्॥ अ
त्र स इत्यस्यानर्थकत्वं भवेत्॥ अथ। योऽविकल्पमिदमर्थमंडलं पश्यतीश निखिलं भवद्वपुः। स्वात्मपक्षपरि

प्रीतेजगत्यस्यानित्यसुखिनःकुतोर्भयाइतीदम्शब्दवदःशाब्दस्तच्छब्दार्थमभिधत्ते।इत्युच्यते।अत्रैववाक्यां
तरेउपादानमर्हति।नचतत्रैव।यच्छब्दस्यहिनिकटस्थितस्तच्छब्दःप्रसिद्धिंपरामृशति।यथा॥यत्रदूर्जितमस्य
श्रेष्ठंतेजोस्यभूपतेः।दीव्यतात्स्तत्तानेननूनंतदपिहारितं॥इत्यत्रतच्छब्दः।ननुकथमत्रतर्हि।कल्याणा
नांत्वमसिमहसांभाजनंविश्वमूर्तेधुर्यांलक्ष्मीमथमयिभृशंदेहिदेवप्रसीद।यद्यत्पापंप्रतिजहिजगन्ना
थनम्रस्यतन्मेभद्रंभद्रंवितरभगवन्भूयसेमंगलाय।अत्रयद्यदित्युक्तातन्मेइत्युक्तं।उच्यते।अत्रयद्य
दितियेनकेनचिद्रूपेणस्थितंसर्वात्मकंवस्त्वाक्षिप्तंतथाभूतमेवतच्छब्देनपरामृश्यते।तथा।किंलोभेनविले
घितैःसभरतोयेनैतदेवंकृतंमास्माभूत्लघुतांगताःकिमथवामातैवमेमध्यमा।मिथ्यैतन्ममचिंतितंद्वितयमप्या
र्यानुजोसौगुरुर्मातातातकलत्रमित्यनुचितंमन्येविधात्राकृतं।अत्रार्यस्येतितातस्येतिवाच्ये॥नत्वनयोःस
मासेगुणीभावश्चार्थः।एवंसमासान्तरेष्वप्युदाहार्योविरुद्धमतिकृत्यथा॥श्रितक्षमारक्तभुवःशिवालिंगितमूर्
तयः।विग्रहक्षपणेनाथशेरतेतेगतासुखाः।अत्रक्षमादिगुणयुक्ताःसुखमासतेइतिविवक्षितेहताइतिविरु
द्धप्रतीतिः।पदैकदेशेयथासंभवंक्रमेणोदाहरणानि।आलमतिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिविरसत्वा

सुत्रमंत्वामिति पाठो वा

त्संगमेनांगनायाः इतीयदिशात कृत्वस्तत्वमालोचयामस्तदपिन हरिणाक्षी विस्मरत्यंतरात्मा ।। अत्र त्वादिति ।।
यथा वा ।। तन्न छसि द्धो कुरुदेवकार्यमथो यमर्थांतरलभ्य एव । अपेक्षते प्रत्ययमंगलद्ध्यै बीजांकुरः प्रागुदयादिवांभः ।
अत्र द्ध्यै इति कष्टं ।। यस्यापारो विभ्रममंडनानां संपादयित्री शिखरैर्बिभर्त्ति । बलाहकच्छेदविभक्तरागामकालसंध्या
मिव धातुमत्तां ।। अत्र मत्ताशब्दः स्वीवार्थे न निहतार्थः । आदावंजनपुंजलिप्तवपुषां श्वासानिलोल्लासितप्रोत्सर्पद्वि
रहानलेन च ततः संतापितानां दृशां । संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो भल्लीनामिव पानकर्म कुरुते कामं
कुरंगेक्षणा ।। अत्र दृशामिति बहुवचनं निरर्थकं । कुरंगेक्षणाया एकस्या एवोपादानात् । न चात्र लसवलितैः प्रमा
र्जैरस्यादिव द्व्यापारभेदाद् बहुत्वं व्यापाराणामनुपात्तत्वात् ।। न च व्यापारे त्वदृक्शब्दो वर्तते । अत्रैव कुरुते त्वा
त्मनेपदमनर्थकं । प्रधानक्रियायाः फलस्य कर्तृसंबंधे कर्त्रभिप्रायक्रियाफलस्याभावात् ।। चापाचार्य
स्त्रिपुरविजयी कार्त्तिकेयो विजेयः शस्त्रव्यस्तः सदनमुदधिर्भूरियं हंतकारः । अस्त्येवैतत्किमु कृतवता रेणुकाकं
ठबाधां बद्धस्पर्द्धस्तव परशुना लज्जते चंद्रहासः ।। अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थं वाचकः । अति
पेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः । परमार्थतः स हृदयं दहति पुनः कालकूटघटितमिव ।। अत्र पेल

वशाद्दः। यः श्रूयते सुरसारन्मुखतीर्थसार्थस्नानेन शास्त्रपारिशीलनकीलनेन। सौजन्यमानजनि... जितउर्जितानां सोयं दृशोः प
तीतिकस्यचिदेव पुंसः। अत्र श्रव्यशब्दः। विनयप्रणयैककेतनं सततं योऽभवदंगताद्दृशः। कथमेष सन्तद्दीक्ष्यते तदभिप्राय
दं समागतः। अत्र प्रेतशब्दः। कस्मिन्कर्मणि सामर्थ्यमस्य नोत्तपते तरां। अयं साधुचरस्तस्माद्दंजलिर्बध्यतामिह। अत्र किंहवेसा
धु कृत्साधुसुचरती तिवासंदेहः। किमुच्यते स्य भूपालमौलिमालमहामणेः। सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते। अ
त्र वचःशब्देन गीःशब्दो लक्ष्यते। अत्र खलु न केवलं सर्वपदं यावदुत्तरपदमपि पर्यायपरिवर्त्तनं न क्षमते। जलध्यादावुत्तरप
दमेवा वडलानलादौ च सर्वपदमेव। यद्यप्यसमर्थस्यैवाप्रयुक्तादयः केचन भेदास्तथाप्यन्यैरलंकारकारैर्विभागेन प्रदर्शिता
इति भेदप्रदर्शनेनोदाहृतेव्याहृति च भिन्नज्योक्ताः।। प्रतिकूलवर्णमुपहतलुप्तविसर्गविसंधि हतवृत्तं। न्यूनाधिककथितपदं प
तत्प्रकर्षं समाप्तपुनरात्तं। अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यं। अपदस्थपदसमासं संकीर्णं गर्भितं प्रसि
द्धिहतं। भग्नप्रक्रममक्रममसमतपरार्थं च वाक्यमेव तथा। रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतत्वं प्रतिकूलत्वं।।
यथा शृंगारे। अकुंठोत्कंठया पूर्णमाकंठं कलकंठि मां। कंबुकंठ्याः क्षणं कंठे कुरु कंठार्त्तिमुद्धर। रौद्रे। देशः सोयमरा
तिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः। तान्येवाहितशास्त्रघस्मरगुरूण्यस्त्रा
णि भास्वंति मे यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः।। अत्र विकटवर्णत्वं दीर्घसमासत्वं चोचितं। यथा। प्रागप्राप्त

निःशुंभशुंभमथनुर्दैर्धाविधाविर्भवत्क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धःक्षणात् । उज्ज्वालःपरशुर्भवत्वशिथिलस्त्वत्कं
ठपीठातिथिर्येनानेन जगत्सु खंडपरशुर्देवोहरःख्याप्यते । यत्र तु नकाराः तत्र चतुर्थपादाभिधानेन तथैव शब्दप्रयोगः । उपहृत
त्वंप्राभोलुप्ताविसर्गोयत्र तत्र ॥ धीरोविनीतोनिपुणोवराकारो नृपोत्तमः । यस्य भृत्याबलोत्सिक्ताभक्ताबुद्धिप्रभाविताः । संधेर्वै
रूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वं च । आद्यं यथा ॥ राजन्विभांति भवतश्चरितानि तानि इंदोर्द्युतिं दधति यानि रसातलेंतः । धीरो विलो
अतितते उचितार्थवृत्ती आतन्वती विजयसंपदमेत्य भातः । यथा वा । तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेंदुः । नि
जवंशउदात्तकांतकांतिर्वृत्तमुक्तामणिवच्चकास्त्यनर्घ्यः । संहितां नक्रोमीति स्वेच्छया सकृदपि दोषः । प्रगृह्यादिहेतुत्वसकृ
त ॥ वेगाद्दुड्डीयगगने चलंडामरचेष्टितः । अयमुत्पत्यते पत्रीततो त्रैव रूपिं कुरु । अत्र संधाववश्लीलता । उर्व्यसावत्र तर्वाली
मर्वेगोचाव्यवस्थितिः । नात्रर्जुर्युज्यते गंतुं शिरोनमयतन्मनाक् ॥ हठलक्षणानुसरणेप्यश्रव्यं ॥ अप्राप्तगुरुभावांतलघु
रसानुगुणं च वृत्तं । यत्र क्रमेणोदाहृ० । अमृतममृतं कः संदेहो मधून्यपि नान्यथा मधुरमधिकं चूतस्यापि प्रसन्नरसं
फलं । सकृदपि पुनर्मध्यस्थः सन्रसांतरविज्जनो वदतु यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात् ॥ अत्र यदिहान्यत्स्वादि
त्यश्राव्यं । यथा वा । जं परिहरिउं तीरइ मणा अ पि ण सुंदरत्तणगुणेण । अह णवर तस्स दोसो पडिवक्खेहिं विपडिवण्णो ॥
अत्र द्वितीयतृतीयगणौ सकारभकारौ ॥ विकसितसहकारभारहारिपरिमलपुंजितगुंजितद्विरेफः । नवकिसल

यत्रारूढचामरश्रीहरितिमुनेरपिमानसंवसंतः॥ अत्रतारिप्रमुदितसौरभेतिपाठोयुक्तः॥ यथावान्यस्तास्तागुणरत्नरोहणभुवोधन्या
मृदन्येवसासंभाराःखलुतेन्यएवविधिनायैरेषसृष्टोयुवा॥ श्रीमत्कांतिजुषांद्विषांकरतलात्स्त्रीणांनितंबस्थलात्दृष्टेयत्रपतं
तिमूढमनसांशास्त्राणिवस्त्राणिच॥ अत्रवस्त्राण्यपीतिपाठेलघुरपिगुरुत्वंभजते॥ हान्यपदंयुथहाकवियंधोविश्वसत्स्नमत
माश्रयेदेव।मुग्धविदग्धसभांतररत्नक्रासिगतःकवयंचतावैते।हास्यरसव्यंजकमेतद्वृत्तं॥ न्यूनपदंयथा॥ तथाभूतांदृष्टान्य
पसदसिपंचालतनयांवनेव्याधैःसार्द्धंसुचिरमुषितंवल्कलधरैः॥ विराटस्यावासेस्थितमनुचितारंभनिभृतंगुरुःखेदंखिन्नेम
यिभजतिनाद्यापिकुरुषु॥ अत्रास्माभिरितिखिन्नइत्यस्माभिःसर्वैमित्यमितिच॥ अधिकंयथा॥ स्फटिकाकृतिनिर्म
लःप्रकामंप्रतिसंक्रांतनिशातशास्त्रतत्वः॥ अविरुद्धसमन्वितोक्तियुक्तःप्रतिमल्लास्तमयोदयःसकोपि॥ अत्राकृ
तिशब्दः॥ यथावा॥ इदमनुचितमक्रमश्चपुंसांयदिहजरास्वपिमन्मथाविकाराः॥ यदपिचनकृतंनितंबिनीनांस्तनपत
नावधिजीवितंरतंवा॥ अत्रकृतमितिकृतंप्रत्युतप्रक्रमभंगमावहति॥ तथावा॥ यदपिचनकुरंगलोचनानांमितिपाठे
निराकांक्षैवप्रतीतिः॥ अधिकंयथा॥ अधिकरतलतल्पंकल्पितस्वापलीलापरिमलननिमीलत्पांडिमागंडपालीसु
तनुकथकस्यव्यंजयत्यंजसैवस्मरनरपतिलीलायौवराज्याभिषेकं॥ अत्रतलेति॥ पतत्प्रकर्षंयथा॥ कःकःकुत्रनघुर्घु

डा

रायितघुरीघोरो घुरेत्सुकारः कः कः कं कमलाकरं विकमलं कर्तुं करीनोद्यतः। केके कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः सिं
हीस्नेहविलासबद्धवसतिः पंचाननो वर्तते॥ समासपुनरात्तं यथा॥ झंकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो झंकारो
रतिमंजरीमधुलिहां लीलाचकोरीध्वनिः। तन्व्याः कंचुलिकापसारणभुजाक्षेपस्खलत्कंकणक्वाणः प्रेमतनोतु वो नव
वयोलास्याय वेणुस्वनः। द्वितीयार्द्धगतेकवाचकशब्दं प्रथमार्द्धं यथा॥ मसृणचरणपातं गम्यतां भूः सदर्भा विरचय सिच
यांतं मूर्ध्नि धर्मः कठोरः। तदिति जनकपुत्री लोचनैरश्रुपूर्णैः पथि पथिकवधूभिर्वीक्षिता शिक्षिता च॥ पूर्वार्द्धगते कवाच
कशब्दमुत्तरार्द्धं यथा। वक्षःस्थलं मुकुंदस्य कौस्तुभांकं कपर्दिनः। चूलो बालचंद्रेण जटाजूटस्थ पातु वः। अभवन्मतद्वयोः
गः संबंधो यत्र। यथा। येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभिर्लीलापानभुवश्च नंदनतरुच्छाया सुयैः कल्पिताः।
येषां हुंकृतयः कृतामरपतिक्षोभाः क्षपाचारिणां किं तैस्त्वत्परितोषकारि विहितं किंचित्प्रवादोचितं॥ अत्र गुणानां परार्थता
दसंबंधः समत्वात्स्यादित्युक्तेन येन यच्छब्दनिर्देश्यानामर्थानां परस्परमसमन्वये यैरित्यत्र विशेषस्याप्रतीतिरिति क्षपाचा
रिभिरिति पाठे युज्यते समन्वयः। यथा वा। त्वमेवं सौंदर्या स च रुचिरतायाः परिचितः कलानां सीमानं पुनरिह युवामेव भजथः
अपि द्वंद्वं दिष्ट्या तदिति सुभगे संवदति वामतः शेषं यत्स्याज्जितमिह तदानीं गुणितया॥ अत्र यदित्यत्र तदिति तदानीमित्यत्र

यदेतिवचनंनास्ति चेत्स्यादिविति युक्तः पाठः।यथावा।संग्रामांगणमंगतेनभवताचापेसमारोपितेदेवाकर्णययेनयेनसहसायद्यत्समा
सादितं।कोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलंतेनत्वंभवताचकीर्त्तिरतुलाकीर्त्याचलोकत्रयं।अत्राकर्णनाक्रियाकर्मत्वे
कोदंडंशरानित्यादिवाक्यार्थस्यकर्मत्वेकोदंडेःशराइतिप्राप्तं।नचयच्छब्दार्थस्तद्विशेषणंवाकोदंडादिनचकेनकेनेत्या
दिप्रश्नः।यथावा।चापाचार्यस्त्रिपुरविजयीत्यादेर्भार्गवस्यनिंदायांतात्पर्येहृतवतेतिपरशोःप्रतीयतेहृतवतइतिनुपाठेमता
योगोभवति।।यथावा।चत्वारोवयमृत्विजःसभगवान्कर्मोपदेष्टाहरिःसंग्रामाध्वरदीक्षितोनरपतिःपत्नीगृहीतव्रता।कौरव्याः
पशवःप्रियापरिभवक्लेशोपशांतिःफलंराजन्योपनिमंत्रणायरसतिस्फीतंयशोदुंदुभिः।अत्राध्वरशब्दःसमासेगुणीभूतइति
तदर्थःसर्वैःसंप्रयुज्यते।तथा।जंघाकांडोरुनालोनखकिरणलसत्केसरालीकरालःप्रत्यग्रालक्तकाभाप्रसरकिसलयोमंजुमंजीर
भृंगः।भर्तुर्नृत्यानुकारेजयतिनिजतनुस्वच्छलावण्यवापीसंभूतांभोजशोभांविदधदभिनवोदंडपादोभवान्याः।अत्रदंडपादाता
निजतनुःप्रतीयते।भवानीसंबंधिनीतुविवक्षिता।अवश्यवक्तव्यमनुक्तंयत्रयथा।अप्राकृतस्यचरितातिशयैश्चदृष्टैरत्यद्भुतैर्मम
हृतस्यतथाप्यनास्था।कोप्येषवीरशिशुकाकृतिरप्रमेयमाहात्म्यसारसमुदायमयःपदार्थः।।अत्रापहृतोस्मीति।अपहृतत्वस्यवि
धिर्वाच्यः।।तथापीत्यस्यद्वितीयवाक्यगतत्वेनोपपत्तेः।।यथावा।एषोहमद्रितनयामुखपद्मजन्माप्राप्तःसुरासुरमनोरथदूरवर्ती
स्वप्नेनिरुद्धघटनाधिगताभिरूपलक्ष्मीफलामसुरराजसुतांविधाय।अत्रमनोरथानामपिदूरवर्तीत्यर्थोवाच्यः।।यथावा।।

त्वयि निवद्धरतेः प्रियवादिनः प्रणयभंगपराङ्मुखचेतसः॥ कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः॥ अत्रापराधस्य लवमपीति वाच्यं॥ अस्थानस्थपदं यथा॥ प्रियेण संग्रथ्य विपक्षसंन्निधावुपाहितां वक्षसि पीवरस्तने॥ स्रजं न काचिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तुनि॥ अत्र काचिन्न विजहाविति वाच्यं॥ यथा वा॥ लग्नः केलिकचग्रहश्लथजटालंबेन निद्रांतरे मुद्रांकः शितिकंधरेंदुशकलेनांतः कपोलस्थलं॥ पार्वत्या नखलक्ष्मशंकितसखीनर्मस्मितह्रीतया प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रः छविः पातु वः॥ अत्र नखलक्ष्मेत्यतः पूर्वं कुटिलाताम्रेति वाच्यं॥ अस्थानस्थसमासं यथा॥ अद्यापि स्तनशैलदुर्गविषमे सीमंतिनीनां हृदि स्थातुं वांछति मान एष धिगिति क्रोधादिवालोहितः॥ प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्फुल्लत्कैरवकोशनिःसरदलिश्रेणीकृपाणं शशी॥ अत्र क्रुद्धस्योक्तौ समासो न कृतः कवेरुक्तौ तु कृतः॥ संकीर्णं यत्र वाक्यांतरपदानि वाक्यांतरमनुप्रविशंति॥ यथा॥ किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमं॥ ननु मुंच हृदयनाथं कंठे मनसस्तमोरूपं॥ अत्र पादगतं हृदयं बहुगुणं हृदयनाथं किमिति न पश्यसि मं कंठे गृहाण कोपं मुंचेति एकवाक्यतायां क्लिष्टमिति भेदः॥ गर्भितं यत्र वाक्यस्य मध्ये वाक्यांतरमनुप्रविशति॥ यथा॥ परापकारनिरतैर्दुर्जनैः सह संगतिः॥ वदामि भवतस्तत्त्वं न विधेया कदाचन॥ अत्र तृतीयः पादो वाक्यांतरमध्ये प्रविष्टः॥ यथा वा॥ लग्नं रागावृतांग्या सुदृढमिह ययैवासियष्ट्यारिकंठे मातंगानामपीह परिपरपुरुषैर्या च दृष्टा पतंती॥ तत्सक्तोयं न किंचिद्गणयति विदितं तेस्तु तेनास्मि दत्ता भृत्येभ्यः

श्रीनियोगाद्धर्तुमिव गतेत्यं बुधियस्य कीर्तिः॥ अत्र विचेदिनं तेरत्तिनित्तत्कृतं॥ प्रस्तुतलक्ष्मीस्तनोपसरतीति विरु
द्धमतिकृत्॥ मंजीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति॥ स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखं॥ इ
ति प्रसिद्धमतिक्रांतं॥ यथा॥ महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचंडघनगर्जितप्रतिरवानुकारी मुहुः॥ रवः
श्रवणभैरवः स्थगितरोदसीकंदरः कुतोद्य समरोदधेरयमभूतपूर्वः पुरः॥ रवो मंडूकादिषु प्रसिद्धो न तु विशेषणे
सिंहनादे॥ भग्नः प्रक्रमः प्रस्तावो यत्र॥ यथा॥ नाथे निशाया नियतेर्नियोगादस्तंगते हंत निशापि याता॥ कुलांगनानां
हि दशानुरूपं नातः परं भद्रतरं समस्ति॥ अत्र गतेति प्रक्रांते तेति प्रकृतेः गता निशापीति युक्तं॥ ननु नैकपदं द्विः प्रयोज्यं
प्रायेण त्वन्यत्र कथितं पदं दुष्टमिति चेद् हेवोक्तिस्तत्कथमेकस्य पदस्य द्विः प्रयोगः उच्यते उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तो वि
षय एकपदद्विःप्रयोगनिषेधस्य॥ तद्वति तु विषये प्रत्युत तस्यैव पदस्य सर्वेनाम्नो वा प्रयोगं विना दोषः॥ तथाहि॥ उदेति सवि
ता ताम्रस्ताम्र एवास्तमेति च॥ संपत्तौ च विपत्तौ च महतामेकरूपता॥ अत्र रक्त एवास्तमेतीति यदि क्रियते तदा पदांतरप्रति
पादितः स एवार्थोर्थांतरतयेव प्रतिभासमानः प्रतीतिं स्थगयति॥ यथा वा॥ यशोधिगंतुं सुखलिप्सया वा मनुष्यसंख्यामति
वर्तितुं वा॥ निरुत्सुकानामभियोगभाजां समुत्सुकेवांकमुपैति सिद्धिः॥ अत्र प्रत्ययस्य सुखमीहितुं वेति युक्तं॥ तेहि मालयमा

लक्ष्मीः १

72

मेत्र पुनः प्रेक्ष्य च शूलिनं। सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥ अत्र सर्वनाम्नः॥ अनेन विसृष्टा इति तु वाच्यं। महीभृतः पुत्र
वतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं। अनंतपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसंगा॥ अत्र पर्यायस्य। महीभृ
तोऽपत्यवतोऽपीति युक्तं। अत्र सत्यपि पुत्रे कन्यारूपेऽपत्ये स्नेहो भूदिके वितसमर्थ्यते। विपदोऽभिभवंत्यविक्रमं रहयत्यापदुपेत
मायतिः। नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः॥ अत्रोपसर्गस्य पर्यायस्य च। तदभिभवः कुरुते निरायतिं लघुतां भ
जते निरायतिर्लघुताभाङ् न पदमिति युक्तं॥ काचित्कीर्णा रजोभिर्दिवमनुविदधौ मंदवक्त्रेंदुलक्ष्मीरश्रीकाः काश्चिदंतर्दि
श इव दधिरे दाहमुद्भ्रांतसत्त्वाः। भ्रेमुर्वात्या इवान्याः प्रतिदिशमपरा भूमिवत्कंपमानाः प्रस्थाने पार्थिवानामशिवमिति पुरो भावि
नार्यः शशंसुः। अत्र वचनस्य। काश्चित्कीर्णा रजोभिर्दिवमनुविदधुर्मंदवक्त्रेंदुशोभाः। निःश्रीका इति कंपमाना इत्यत्र कंपमा
पुरिति पठनीयं॥ गाहंतां महिषा निपानसलिलं शृंगैर्मुहुस्ताडितं छायाबद्धकदंबकं मृगकुलं रोमंथमभ्यस्यतु। विस्रब्धं क्रि
यतां वराहपतिभिर्मुस्ताक्षतिः पल्वले विश्रांतिं लभतामिदं च शिथिलज्याबंधमस्मद्धनुः॥ अत्र कारकस्य। विस्रब्धाः कुर्वंतु सू
करवरा इत्यदुष्टं॥ अकथिततपोतेजोवीर्यः प्रथिम्नि यशोनिधाववितथमदाध्माते रोषान्मुनावभिधावति। अभिन
वधनुर्विद्यादर्पक्षमाय च कर्मणे स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च॥ अत्र क्रमस्य। पादोपसंग्रहणायेति हि पूर्वं

३६

वाच्यं॥ एवमन्यत्रप्यनुसर्त्तव्यं। अविद्यमानक्रमो यत्र। हृदयंगतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः। कलावतः कां
तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी। अत्र त्वंशब्दप्रयोगादनंतरं चकारो युक्तः। यथा वा। शक्तिर्निस्त्रिंशजेयं तव
भुजयुगले नाथ दोषाकरश्रीर्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः। आज्ञेयं सर्वगा ते विलसति च पुनः किं मया
दृष्टया ते प्रोच्यते वेत्थं प्रकोपाच्छशिकरसिततया यस्य यस्य कीर्त्या प्रयाते। अत्रेत्थं प्रोच्येवेति न्याय्यं। तथा। लग्नं रागावृतांग्या
त्यादावैवितिश्रीनियोगादिति वाच्यं। अमतः प्रकृतविरुद्धः परार्थो यत्र। यथा। राममन्मथशरेण ताडिता दुःसहेन हृदये नि
शाचरी। गंधवद्रुधिरचंदनोक्षिता जीवितेशवसतिं जगाम सा॥ अत्र प्रकृतस्य विरुद्धस्य शृंगारस्य व्यंजकोऽपरार्थः॥ अर्थदो
षानाह। अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः। संदिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च। अनवीकृतः सनियमविशे
षाविशेषपरिवृत्ताः। साकांक्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः। विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्ली
लः। दुष्ट इति संबध्यते॥ क्रमेणोदाहरणानि॥ अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानंदः। मरुदुल्लासितसौरभकमला
करहासकृद्रविर्जयति। अत्रातिविततत्वादयो नुपादानेपि प्रतिपाद्यमानमर्थं न बाधंत इत्यपुष्टाः॥ न त्वसंगताः पुनरुक्ता वा॥
सदा मध्ये यासामियममृतनिष्यंदसरसा सरस्वत्युद्दामा वहति बहुमार्गा परिमलं। प्रसादं ता एता घनपरिचिताः केन महतां

महाकाव्यं व्योम्नि स्फुरितमधुरायां तु रुचयः॥ अत्र त्रयाणां कविरुक्तीनां मध्ये सुकुमारविचित्रमध्यमात्मकत्रिमार्गा भारती च मुक्ता
रं वहति। ताः गंभीरकाव्यपरिचिताः। कथमितरकाव्यवत्प्रसन्ना भवंतु॥ यासामादित्यप्रभाणां मध्ये त्रिपथगा वहति। ता घनपरि
चिताः कथं प्रसन्ना भवंतीति संक्षेपार्थः। जगति जयिनस्ते ते भावा नवेंदुकलादयः प्रकृतिमधुराः संत्येवान्ये मनो मदयंति ये। मम तु
यदियं याता लोके विलोचनचंद्रिका नयनविषयं जन्मन्येकः स एव महोत्सवः॥ अत्रेंदुकलादयो यं प्रति यस्य यशश्छायाः स एव
चंद्रिकात्वं उत्कर्षार्थमारोपयतीति व्याहतत्वं। अर्जुनार्जुन। कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भि
रुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं॥ अर्जुनेति भवद्भिरिति चो
क्ते सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः॥ यथा वा॥ अस्त्रज्वालावलीढप्रतिबलजलधेरंतरौर्वायमाणे सेनाना
ये स्थितेस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणां। कर्णालं संभ्रमेण व्रज कृप समरं मुंच हार्दिक्य शंकां ताते चापद्वितीये वहति रणधुरां
को भयस्यावकाशः॥ अत्र चतुर्थपादवाक्यार्थः पुनरुक्तः॥ भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव। विश्राणय तुरंगं मे मातंगं वा
मदालसं। अत्र मातंगस्य प्राङ्निर्देशो न्याय्यः॥ स्वपिति जावदयं निकटे जनः स्वपिति यावदहं किमपैति ते। तदपि सांप्रतमाह
रूपकं त्वरितमूरुमुदंचय कुंचितां। एषो विदग्धः॥ मात्सर्यमुत्सार्येत्यादि। अत्र प्रकरणाद्यभावे संदेहः। शांतं शृंगारमन्यतराभिधाने

तुनिश्चयः॥ गृहीतं येनासीः परिभवभयान्नोचितामपि प्रभाधस्यासीन्नरवलु तत्र कश्चिन्न विषयः। परित्यक्तं तेन त्वमसि सुत
शोकान्मृत्युभयाद्विमोक्ष्ये शास्त्रतामहमपि यतः स्वस्ति भवतो। अत्र शास्त्रमोचने हेतुनोपात्तः॥ इदं ते केनोक्तं कथय कमलातं केव
दने यदेतस्मिन्नेकः कटकमिति धत्से खलु धियं। इदं तत्र दुःसाधाक्रमणपरसैन्यं मोस्य तिभुगातत्र पीत्या तत्कं करकमल
मूले विनिहितं। अत्र कामस्य च क्रं लोके प्रसिद्धं॥ उपपरिसरं गोदावर्याः परित्यज्यताध्वगाः सरणिमपरो मार्गस्तावत्स्वरि
रिहेक्ष्यतां। इह हि विहितो रक्ताशोकः कयापि हताशया चरणनलिनन्यासोदंचन्नवांकुरकंचुकः। अत्र पादघाते नाशो
कपुष्पो द्रुमः कविषु प्रसिद्धः नपुनरंकुरो द्रुमः॥ सुसितवसनालंकारायां कदाचन कौमुदीमहसि सुदृशि स्वैरं यांत्यां ग
तोस्तमभूद्विधुः॥ तदनु भवतः कीर्तिः केनाप्यगीयत येन सा प्रियगृहमगान्मुक्ताशंका क्वनासि शुभप्रदः॥ अत्र [illegible] ना
मूर्तापि कीर्तिर्ज्योत्स्नावत्प्रकाशरूपा कथितेति लोककविसमयमपि कविप्रसिद्धं न दुष्टं। सदा स्नाता नित्याशिशिथिन्यां सकालं
वासरं बुधः। नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च। ग्रहोपरागे विना रात्रौ स्नानं धर्मशास्त्रेण विरुद्धं। अत्र नन्त्यासह
शांयस्य वलं वाक्कान्समीक्ष्यते। पाक्कुलायानुस्थितिस्तस्य सत्यं सा निःप्रयोजना। एतदर्थं शास्त्रेणा विधाय दूरे केयूरमनंगा
गणमंगना। बभार कांतेन कृतां रुजो ह्नेस्वमालिकां। केयूरपदेन खड्गक्षतं विहितं। अत्र छांगयोगपरिशीलनकौशलेन दुःसा

क

धासि डिंडिमध्वनिधीरं ग्रस्य वादि डुरे ॥ आसादयन्नभिमतामधुना विवेकख्यातिं समाधिघनमौलिमणिर्विमुक्तः ॥ विवेक
ख्यातिः संप्रज्ञातः पश्चादसंप्रज्ञातस्ततो मुक्तिर्मनुविवेकख्यातौ ॥ एवं विद्योतैरपि विरुद्धमुदाहार्यं ॥ प्राप्ताः श्रियः सकलकाम
दुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं । संतर्पिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः
किं ॥ अत्र ततः किमिति न नवीकृतं ॥ तत्तु यथा ॥ यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः । लवणमम्बु सदैव महो
दधेः प्रकृतिरेव सतामविषादिता ॥ अत्रानुल्लिखिताक्षमेव निखिलं निर्माणमेतद्विधेरुत्कर्षप्रतियोगिकल्पनमपि न्यक्का
रकोटिः परा ॥ याताः प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्संपदस्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितं ॥ अत्र छाया
मात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचितेति समनियमत्वं वाच्यं ॥ वक्त्राम्भोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते बा
हुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः । वाहिन्यः पार्श्वमेताः क्षयमपि भवतो नैव मुञ्चत्यभीक्ष्णं स्वच्छेऽन्तर्मानसेऽस्मि
न्कथमवनिपते तेम्बुपानाभिलाषः ॥ अत्र शोण एवेति नियमो न वाच्यः ॥ श्यामां श्यामलिमानमानय मानयत भोः सान्द्रैर्मषीकूर्चकै
र्मन्त्रं तन्त्रमथ प्रयुज्य हरत श्वेतोत्पलानां श्रियं । चन्द्रं चूर्णयत क्षणाच्च कणशः कृत्वा शिलापट्टके येन द्रष्टुमहं क्षमे दश दिशस्त
द्वक्त्रमुद्राङ्किताः ॥ अत्र ज्योत्स्नीमिति श्यामाविशेषो वाच्यः ॥ कण्ठोत्सवेष्टितदृषत्प्रसरः प्रहारैरत्नान्यमूनि मकरालय मा

वमंस्याः॥ किं कौस्तुभेन विहितो भवतो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोपि॥ अत्र एकेन किं न विहितो भवतः स नामेति
वाच्यं॥ सामान्यं॥ अर्थित्वे प्रकटीकृतेपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया। उत्कर्ष
परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च जगत्यतीति दशमुखो देवः कथं मृष्यते। अत्र स्त्रीरत्नमुपेक्षितुमित्याकांक्षति॥
न हि परस्येत्यनेन संबंधो योग्यः॥ आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं भक्तिर्भूतपतौ पिनाकिनि
पदं लंकेति दिव्या पुरी। उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः॥
अत्र स्याच्चेदेष न रावण इत्यंत एव समाप्यं॥ श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा। निशा शशां
केन धृतिः समाधिना नयेन चालंक्रियते नरेंद्रता॥ अत्र श्रुतादिभिस्तुल्यकक्षैः सहचरैर्व्यसनमूर्खतयोर्निकृष्टयोर्भि
न्नत्वं। लग्नं रागावृतांगेत्यत्र विदितं तेस्त्विति। अनेन श्रीस्तत्समादय सरस्वतीति विरुद्धं प्रकाश्यते। प्रयत्नपरिबोधि
तस्तुतिभिरद्य शेषे निशामकेशवमपांडवं भुवनमद्य निःसोमकं। इयं परिसमाप्यते रणकथाद्य दोःशालिना
मपैतु रिपुकाननातिगुरुरद्य भारो भुवः॥ अत्र शायितः प्रयत्नेन बोध्यस इति विधेयं॥ यथा वा॥ वाताहारतया
जगद्विषधरैराश्वास्य निःशेषितं तेग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः। तेपि क्रूरचमूरुचर्मवसनैर्नी

तासयंलुब्धकैर्दंभस्यस्फुरितंविदन्नपिजनोजाल्मोगुणोनीहृतो।अत्रवाताहारादित्रयंव्युत्क्रमेणवाच्यं।अ
रामादत्ताभरणभसनेष्व्रालिशारस्मरक्रीडाव्रीडाशमनविरहिप्राणदमन।मृशोदंसोत्तंसप्रत्नदलनीलोत्प
लसखेसखेदोदंमोदंस्फुरुथयकथयच्छेकेंदुवदना।अत्रदिविरहिप्राणदमनेतिनानुगोद्यो।लयन्नरागात्हतोग्येत्याद्य
त्रविदितेतेरित्त्युपसंहृतोपितेनेत्यादिपुनस्तपात्तःहेतुमेवप्रहस्यस्तष्पस्यविवरेविणः।यथाश्रुजायतेपातो
नतथापुनरुन्नतिः।अत्रपुंव्यंजनस्याविप्रतीतिः।यत्रेकोपदोषःप्रदर्शितस्तत्रदोषांतराण्यपिसंभिततथापितेषांतत्रा
प्रकृतत्वात्प्रकाशनेनकृतं।कर्णावतंसादिपदेकर्णादिध्वनिनिर्मितिःसन्निधानादिवोधार्थे।अवतंसादी
निकर्णाद्याभरणान्युच्यंते।तत्रकर्णादिशब्दाःकर्णादिस्थितिप्रतिपत्तये।यथा।अस्याःकर्णावतंसेनजितं
सर्वविभूषणं।तथैवशोभतेत्यंतमस्याःश्रवणकुंडलं।अपूर्वमधुरामोदप्रमोदितदिशस्ततः।आययुर्भृंगमु
खराःशिरःशेखरशालिनः।अत्रकर्णश्रवणशिरःशब्दाःसान्निधानप्रतीत्यर्थं।विदीर्णाभिमुखारातिकराले
संगरांतरे।धनुर्ज्याकिणचिह्नेनदोष्णाविस्फुरितंतव।अत्रधनुःशब्दःआरूढत्वावगतये।अन्यत्रतुज्या
बंधनिष्पंदभुजेनयस्यविनिःश्वसद्वक्त्रपरंपरेण।कारागृहेनिर्जितवासवेनलंकेश्वरेणोषितमाप्रसादात्

तेव

इति केचल्लोऽज्याशब्दः। प्राणेश्वरपरिष्वंगविभ्रमप्रतिपत्तिभिः। मुक्ताहारेण लसता हसतीव स्तनद्वयं। अत्र मुक्तानामन्यतरत्वा
मिश्रितत्वबोधनाय मुक्ताशब्दः। सौंदर्यसंपत्तारुण्यं यस्यास्ते विभ्रमाः। षट्पदा पुष्पमालेव कान्तं कर्षति सा सखे। अत्र
त्रोत्कृष्टपुष्पशब्दः निरूपपदो हि मालाशब्दः पुष्पस्रजमेवाबधत्ते। स्थितेष्वेतत्समर्थनं। न खलु कर्णावतंसादिवज्ज
घनकांचीत्यादि क्रियते। जगाद मधुरां वाचं विशदाक्षरशालिनीं। इत्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थप्रतीति
सिद्धेर्गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं क्वचित्प्रयोगः कार्य इति न युक्तमुक्तं। युक्तत्वे वा। चरणत्रपरित्राणर
हिताभ्यां मविद्रुतं। पादाभ्यां दूरमध्वानं व्रजन्नपि न खिद्यत इत्युदाहार्यं [illegible] स्यात्। तेऽर्थे निर्हेतोरदुष्टता। यथा। चंद्रं गता
पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां। उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः। अत्र रात्रौ
पद्मस्य संकोचो दिवा चंद्रमसश्च निःप्रभत्वं लोकप्रसिद्धमिति न युक्तो हेतुर्नापेक्षितं। अनुकरणे तु सर्वेषां। श्रुति
कटुप्रभृतीनां तेषामनां न दुष्टत्वं। यथा। मृगचक्षुषमद्राक्षमित्यादि कथयत्ययं। वश्येषु च गवित्याह सुत्रामाणं यजेति
चा वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचिन्नोभौ। वक्तृप्रतिपाद्यव्यंग्यवाच्यप्रकरणादीनां महिम्ना दोषोऽपि क्वचिद्गुणः
तत्र वैयाकरणो हि वक्ता प्रतिपाद्ये वा रौद्रादौ च रसे व्यंग्ये कष्टत्वं गुणः। क्रमेणोदाहरणानि। दीधीङ्वेवीङ्समः कश्चिद्

णद्दग्रोरभाजनं॥ किं प्रत्ययनिभः कश्चिद्यत्र संनिहितो न ते। यदा त्वामहमद्राक्षं पदविद्याविशारदं। उपाध्यायं यतो स्मार्षं समस्प्राक्षं च संपदं॥ अत्र प्रातरुदत्क पालनतलक्रूरक्कणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराघोषयंत्त्यंबरं। पीतच्छादितरक्तकर्दमघनप्राग्भारघोरोल्लसद्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति। काव्यवशात्। यथा॥ मातंगाः किमु द्दंहितैः किमफलैराडंबरैर्जंबुकाः सारंगा महिषा मदं व्रजत किं शून्येषु शूरा न के। कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः सिंधुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितं॥ अत्र सिंहे वाच्ये पुरुषाः शब्दाः प्रकरणवशात्। यथा। रक्ताशोक कृशोदरी क नु गता त्यक्त्वानुरक्तं जनं नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः। उत्कंठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहतिमंतरेण भवतः पुष्पोद्गमोयं कुतः। अत्र शिरोविधुननेन कुपितस्येव वचांसि। क्वचिन्नीरसे न गुणो न दोषः। यथा। शीर्णघ्राणांघ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन्यः। घर्मांशोस्तस्य वोंतर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातं॥ अप्रयुक्तनिहतार्थौ श्लेषादौ न दुष्टौ। यथा। येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च यो धारयत्। यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः ५०

वल्गितैरिति पाठः

पायात्सस्वयमेधकक्षयकरस्त्वांस वेदीमाधवः। अत्रमाधवपक्षेशशिमदंधकक्षयकरशब्दावप्रयुक्तनिहतार्थौ। अ
श्लीलंक्वचिद्गुणः। यथा। सुरतारंभगोष्ठ्यांतांबूलदाननिधिनाविसृजेद्दयस्यांद्वार्थैःपदैःपिशुनयेच्चरहस्यवस्तिति
कामशास्त्रास्थितो। करिहस्तेनसंबाधेप्रविश्यांतर्विलोडिते। उपसर्पन्ध्वजःपुंसःसाधनांतर्विराजते। शमकथासु
उत्तानोच्छूनमंडूकपाटितोदरसन्निभे। क्लेदिनिस्त्रीव्रणेसक्तिरकृमेःकस्यजायते। नि[illegible]णवैरदहनाः
प्रशमादरीणांनंदंतुपांडुतनयाःसहमाधवेन। रक्तप्रसाधितभुवःक्षतविग्रहाश्चस्वस्थाभवंतुकुरुराजसुताःसभृ
त्याः। अत्रभाव्यमंगलसूचके। संदिग्धमपिवाच्यमहिम्नाक्वचिन्नियतार्थप्रतिपत्तिंकचैवव्याजस्तुतिपर्यवसायित्वे
गुणः। यथा। पृथुकार्तस्वरपात्रंभूषितनिःशेषपरिजनंदेव। विलसत्करेणुगहनंसंप्रतिसममावयोःसदनं। प्रतिपाद्य
प्रतिपादकयोर्ज्ञत्वेसत्यप्रतीतोगुणः। यथा। आत्मारामाविहितरतयानिर्विकल्पेसमाधौज्ञानोत्सेकाद्विघटित
तमोग्रंथयःसत्वनिष्ठाः। यंवीक्षंतेकमपितमसांज्योतिषांवापरस्तात्तंमोहांधःकथमयममुंवेत्तिदेवंपुराणं। स्वयंवा
परामर्षेयथा। षडधिकदशनाडीचक्रमध्यस्थितात्माहृदिविनिहितरूपःसिद्धिदस्तद्विदांयः। अविचलितमनो
भिःसाधकैर्मृग्यमाणःसजयतिपरिणद्धःशक्तिभिःशक्तिनाथः। अधमप्रकृत्युक्तिषुग्राम्योगुणः। यथा। फुल्ल

फोंचीतिपाठः

कारंकम्बल्लमंकूरसमं वा इंति जे सिंदुवारविडवा मह वइत्तहाव तो जे गालिदस्स महिसीदहिलो सरिस्सा तो। किंच मुद्दवि
य इह त्न पसरा णपुंजा॥ अत्र कलमभक्तमहिषीदधिशब्दा ग्राम्या अपि विदूषकोक्तौ। न्यूनंपदं क्वचिद्गुणो यथा। गाढा
लिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सांद्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा। मामामानदमातिमामल
मिति क्षामाक्षरोल्लापिनी सुप्ता किन्नु मृता नु किं मनसि मे लीना विलीना नु किं। क्वचिन्न गुणो न दोषः। यथा। तिष्ठे
त्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः। तां हर्तुं विबुधद्वि
षोपि न च मे शक्ताः पुरोवर्तिनीं सा चात्यंतमगोचरं नयनयोर्यातेति कोयं विधिः। अत्र पिहितेत्यतो नेतरं नैतद्यत
इत्येतैर्न्यूनैः पदैर्विशेषबुद्धेरकरणान्न गुणः। उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधत इति न दोषः। अधिकं पदं क्व
चिद्गुणो यथा। यद्वंचनाहितमतिर्बहुचाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति। तत्साधवो न न विदंति विदं
ति किंतु कर्तुं वृथा प्रणयमस्य न पारयंति। अत्र विदंतीति द्वितीयमन्ययोगव्यवच्छेदपरं। यथा। वद वद जितः स श
त्रुर्न हतो जल्पंश्च तव तवास्मीति। चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे। इत्येवमादौ हर्षभयादियुक्ते वक्तरि। कथित
पदं गुणो लाटानुप्रासे अर्थांतरसंक्रमितवाच्ये विहितस्यानूद्यत्वे च। क्रमेणोदाहरणानि। सितकरकररुचिरविभावि

भाकराकारधरणिधवकीर्त्तिः। पोषकमला कमला सा पितैवैवा। न्निनान्यस्य॥ तालाजापत्तिगुणजालोदे सहित्यपदि
दीप्यत्तिरद्रुकिरणागुणगादि आदिहो विकमलाकमलाद्रं। विकशितानि॥ जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विज
यादवाप्यते। गुणप्रकर्षेण जनोनुरज्यते जनोनुरागप्रभवा हि संपदः। पतत्प्रकर्षमपि केचिद्गुणः। यथा। उदाहृते आग
ब्राहीत्यादौ। समासपुनरात्तं केचिन्न गुणं न दोषः। यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणमपितु वाक्यांतरमेव क्रियते। य
था त्वेव प्रागप्राप्तेत्यादौ। अपदस्थसमासं केचिद्गुणं यथा। उदाहृते रक्ताशोकेत्यादौ। गर्भितं तथैव। यथा। हुंमित्रेव
हस्तिअरे होनिरंकुसो अह विवेअरहिं अविअ। स्तिविलोवितुमम्मिपुरोपत्तिअमर्त्तिमायम्हुत्ति। मि॥ अत्र वनीतीतिम
ध्ये दृढप्रत्ययोत्पादनाय। एवमन्यदपि लक्ष्यो लक्ष्ये। व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया व्य
क्तिरनुभावविभावयोः। प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः। अकांडे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः॥
अंगिनोननुसंधानं प्रकृतीनां विपर्ययः। अनंगस्याभिधानं च रसे दोषाः स्फुटी हताः॥ स्वशब्दोपादाव्यभिचारिणो
यथा। सव्रीडा दयितानने सकरुणा मातंगचर्मांबरे सत्रासा भुजगे सविस्मयरसा चंद्रेऽमृतस्यंदिनि। सर्ष्या जन्हुसुता
वलोकनविधौ दीना कपालोदरे पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः। अत्र व्रीडादीनां। व्यानम्राद

यितानने मुकुलितामोतंगचर्मांबरे सोत्कंपा भुजगे निमेषरहिता चंद्रे मृतस्यंदिनी। मीलभ्रूः सुरसिंधुदर्शनविधौ म्ला
नाकपालोदरे। इत्यादिस्तु युक्तो। रसस्य स्वशब्देन शृंगारादिशब्देन वाच्यत्वं। क्रमेणोदाहरणं। तामनंगजयमंगलश्रियं किं
चिदुच्चभुजमूललोकितां। नेत्रयोः कृतवतोस्य गौरे कोप्यजायत रसो निरंतरः॥ आलोच्य कोमलकपोलतलाभि
षिक्तव्यक्तानुरागसुभगामभिरामरूपां। पश्येष बाल्यमतिवृत्य विवर्तमानः शृंगारसी[illegible]मनि तरंगितमातनोति॥
स्थायिनो यथा। संप्रहारे प्रहरणैः प्रहाराणां परस्परं। ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत्॥ अत्रोत्साह
स्य। कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मंडले शिशिररोचिषि तस्य यूनः। लीलाशिरोंशुकनिवेशविशेषक्लृप्ति
व्यक्तस्तनोन्नतिरभून्नयनावनौ सा॥ अत्रोद्दीपनालंबनरूपाः शृंगारयोग्या विभावानुभावाः पर्यवसायिनः स्थि
ता इति कष्टकल्पना॥ परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः। इति बत विषमा दशास्य देहं परिभ
वति प्रसभं किमत्र कुर्मः॥ अत्र रतिपरिहारादीनामनुभावानां करुणादावपि संभवात्कामिनीरूपो विभावो यत्नतः प्रति
पाद्यः। प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव ते सिंचतु वचः। निधानं सौ[illegible]ख्यानां
जनमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः। अत्र शृंगारे प्रतिकूलस्य शांतस्यानित्यता

प्रकाशरूपोऽपि विभावस्तत्प्रकाशिनो निर्वेदस्य व्यभिचारिण उपन्यासः। णिहुअरमणम्मि लोअसावहासम्मि पडिए गुरूणा
मज्झम्मि। सअलपरिहारहिअआ आवणगमणं वेअ महइ वहू। अत्र सकलपरिहारवनगमने शान्तानुभावौ। इंध
नाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेन्न दोषः। दीप्तिः पुनः पुनर्यथा। कुमारसंभवे रतिप्रलापे। अकाण्डे प्रथनं य
था। वेणीसंहारे द्वितीयेऽनेकसंजयप्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारवर्णने। छेदो यथा। वीरचरिते द्वितीयें
के राघवभार्गवयोर्धाराधिरूढे वीररसे कंकणमोचनाय गच्छामीति राघवस्योक्तौ। अंगस्याप्रधानस्य। इति विस्तरेण
वर्णनं यथा। हयग्रीववधे हयग्रीवस्य। अंगिनोऽननुसंधानं यथा। रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया
विस्मृतिः। प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च। वीररौद्रशृंगारशान्तरसप्रधाना धीरोदात्तधीरोद्धतधीरललित
धीरप्रशान्ता उत्तमाधममध्यमाश्च। तत्र रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दिव्येष्वपि। किंतु रतिः संभोगशृंगाररू
पा उत्तमदेवताविषया न वर्णनीया। तद्वर्णनं हि पित्रोः संभोगवर्णनमिवात्यंतमनुचितं॥ क्रोधं प्रभो संहर संहरे
ति यावद्गिरः खे मरुतां चरंति। तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकारेत्युक्तवत् भ्रुकुट्यादिविकारवर्जितः
सद्यःफलदः क्रोधः। स्वर्गपातालगमनसमुद्रोल्लंघनाद्युत्साहश्च दिव्येष्वेव। आदिव्येषु तु यावदवदानं प्रसिद्धमु

र

स्वा

चितं वा तावदेवोपनिबंध्यम्। आधिकं तु निबध्यमानमसत्यप्रतिभासेन नायकवदाचरितव्यं न प्रतिनायकवदित्युपदेशे
न पर्यवस्येत्। दिव्यादिव्येषु तूभयथापि। एवमुक्तस्यौचित्यस्य दिव्यादीनामिव धीरोदात्तादीनामप्यन्यथा वर्णनं विप
र्ययः। तत्र भवन् भगवन्नित्युत्तमेन नाधमेन मुनिप्रभृतौ न राजादौ भट्टारकेति च राजादौ परमेश्वरेति न मुनिप्रभृतौ प्र
कृतिविपर्ययापत्तेर्वाच्यं। एवं देशकालवयोजात्यादीनां वेषव्यवहारादिषु समुचितमेवोपनिबंधव्यं। अनंगस्य रसानुपका
रकस्य वर्णनं यथा। कर्पूरमंजर्यां नायिकया स्वात्मना च वसंतवर्णनमनादृत्य वंदिवर्णितस्य तस्य राज्ञः प्रशंसनं। ईदृग्या
हृति नायिकापादप्रहारादिना नायककोपादिवर्णनं। उक्तं हि ध्वनिकृता। अनौचित्यादृते नान्यद्रसभंगस्य कारणं॥
प्रसिद्धौचित्यबंधस्तु रसस्योपनिषत्परेति॥ इदानीं क्वचिददोषा अप्येत इत्युच्यते। न दोषः स्वपदेनोक्तावपि संचा
रिणः क्वचित्। यथा। औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया तैस्तैर्बंधुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः॥
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥ अत्रौत्सुक्यशब्दवत्त
दनुभावेन तथा प्रतीतिरिति कृतं। अत एव दूरादुत्सुकमित्यादौ व्रीडाद्यनुभावानां विचलितत्वादीनामिवौत्सुक्यानुभाव
स्य सासूयस्मरणादिरूपस्य तथा प्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतं। संचार्यादेर्विरुद्धस्य बाध्यत्वोक्तिर्गुणावहा॥ ५२

स॰

वाच्यत्वेनोक्तिर्न परमदोषाय यावत्प्रकृतरसपरिपोषकत्वाद्यथा। क्वाकार्यं शशलक्ष्मणः क्व च कुलमित्यादौ च वितर्कादिषु
कृतेष्वपि चिंतायामेव विश्रान्तिरिति प्रकृतरसपरिपोषः। पांडुक्षामं वदनं हृदयं सरसं तवालसं च वपुः। आवेदयति नितांतं क्षे
त्रियरोगं सखि हृदंतः। इत्यादौ साधारणत्वं पांडुतादीनामिति न विरुद्धं। सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः। किंतु मत्तां
गनापांगभंगलोलं हि जीवितमित्यत्राद्यमर्द्धं वाच्यत्वेनोक्तं। जीविताद्यधिकमपांगभंगस्यास्थिरत्वमिति प्रसिद्धान्मुले
पमानतयोपात्तं शांतमेव पुष्णाति न पुनः शृंगारस्यात्र प्रतीतिस्तदंगाप्रतिपत्तेर्न तु विनेयोन्मुखीकरणमत्र परिहारः शांतशृंगा
रयोर्नैरंतर्यस्याभावान्नापि काव्यशोभाकरणं रसांतरादनुप्रासमात्राद्धि तथाभावात्। आश्रयैक्ये विरुद्धो यः स कार्यो भिन्न
संश्रयः। रसांतरेणांतरितो नैरंतर्येण यो रसः। वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयित
व्यः। शांतशृंगारयोस्तु नैरंतर्येण विरोध इति रसांतरमंतरे कार्यं। यथा नागानंदे शांतस्य जीमूतवाहनस्य। अहो गीतमहो वा
द्यमित्यद्भुतमंतर्निवेश्य मलयवतीं प्रति शृंगारो वर्णितः। न परं प्रबंधे यावदेकस्मिन्नपि वाक्ये रसांतरव्यवधिना विरोधो निवर्त
ते। यथा। भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः। गाढं शिवाभिः परिरभ्यमाणान्सुरांगनाश्लिष्टभुजांतरा
लाः। सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान्। संवीजितश्चंदनवारिसेकैः सुगंधिभिः कल्पलतादु
कूलैः।। विमानपर्यंकतले निषण्णाः कुतूहलाविष्टतया तदानीं। निर्दिश्यमानांल्ललनांगुलीभिर्वीराः स्वदेहान्पतितानप

स्यन्। अत्र वीभत्सशृंगारयो रतिवीररसो निवेशितः। स्मर्यमाणो विरुद्धोपि साम्येनाथ विवक्षितः। अंगिन्यंगत्वमाप्तौ यौ
तौ न दुष्टौ परस्परं। अयं स रसनोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः। एतत् भूरिश्रवसः समरभु
वि पतितं हस्तमालोक्य तद्वधूभिरुच्यते। अत्र पूर्वावस्थास्मरणं शृंगारांगमपि करुणं परिपोषयति। दंतक्षतानि करजैश्च वि
पाटितानि प्रोद्भिन्नसांद्रपुलके भवतः शरीरे। दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि। अत्र का
मुकस्य दंतक्षतादीनि यथा चमत्कारकारणानि तथा जिनस्य। यथा च परः शृंगारी तदवलोकनात् सस्पृहस्तद्वदेतादृशो मु
नय इति साम्यविवक्षा। क्रामंत्यः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः पातितयावकैरिव पतद्बाष्पांबुधौता
ननाः। भीता भर्तृकरावलंबितकरास्त्वच्छत्रुनार्योधुना दावाग्निं परितो भ्रमंति पुनरप्युद्यद्विवाहा इव। अत्र चाटुके राजवि
षया रतिः प्रतीयते तत्र करुण इव शृंगारोप्यंगमिति तयोर्न विरोधः। यथा। एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर। एवमा
शाग्रहग्रस्तैः क्रीडंति धनिनोर्थिभिः। इति अत्र एहीति क्रीडं तिष्ठेति क्रीडं इतीति क्रीडनापेक्षया गमनागमनयोर्न वि
रोधः।। क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण। आ
लिंगन्योवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निरित्यत्र पुराणि पु
प्रभावातिशयस्य करुणोंगं। तस्य तु शृंगारः। तथापि करुणे विश्रांतिरिति तस्यांगतैव। अथवा। प्राग्यथा कामुक आचरति स्म

८ = माधुर्यव्यवहार■प्रवृत्तेर मधुरादिरसांगानां वर्णानां = ८

तथाद्यशरारग्निरिति शृंगारपोषिते करुणेन मुख्य एवार्थ उपोद्बल्यते। उक्तं हि। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्र
धानस्योपकारे हि तथा भूयसि वर्तते॥ इति प्राक्प्रतिपादितरूपस्य रसस्य रसांतरेण न विरोधो नाप्यंगांगिभावो भवतीति र
सशब्देनात्र तत्स्थोऽपि भाव उपलक्ष्यते। इति काव्यप्रकाशे दोषदर्शनो नाम सप्तम उल्लासः॥ ॥ एवं दोषानुक्त्वा गु
णालंकारविवेकमाह॥ ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥ आत्मन
एव हि यथा शौर्यादयो नाकारस्य तथा रसस्यैव माधुर्यादयो न वर्णानां। क्वचित्तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शना
दाकार एवास्य शूर इत्यादेर्व्यवहारादन्यत्र शूरेऽपि वितताकृतित्वमात्रेण शूर इति। क्वापि शूरेऽपि मूर्तिलाघवमात्रेणा
शूर इत्यविश्रांतप्रतीतयो यथा व्यवहरंति। तद्वन्मधुरादिरसव्यंजकसुकुमारवर्णानां सौकुमार्यादिमात्रेण माधुर्यादि
मधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि रसपर्यंतविश्रांतप्रतीतिवंत्या व्यवहरति। अत एव माधुर्याद
यो रसधर्माः समुचितैर्वर्णैर्व्यज्यंते न तु वर्णमात्राश्रयाः। यथैषां व्यंजकत्वं तथोदाहरिष्यते। उपकुर्वंति तं संतं येऽङ्गद्वा
रेण जातुचित्। हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥ ये वाचकवाच्यलक्षणांगातिशयमुखेन मुख्यं रसं संभविनमु
पकुर्वंति। ते कंठाद्यंगानामुत्कर्षाधानद्वारेण शरीरिणोऽप्युपकारका हारादय इवालंकाराः। यत्र तु नास्ति रसस्तत्रो
क्तिवैचित्र्यमात्रपर्यवसिताः। क्वचित्तु संतमपि नोपकुर्वन्ति। यथा। अपसारय घनसारं कुरु हारं दूर एव किं कमलैः॥

मा

89

खलमल्लमालिमृणाल्लैरितिवदति दिवानिशं वाला। इत्यादौ वाचकलुप्तेन। मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्र
माथी निर्धूमं ज्वलति विधुतः पावक इव। हिनस्ति प्रत्यंगं ज्वर इव वलीयानित इतो न मां त्रातुं तातः प्रभवति न चांबा
न भवती त्यादौ वाच्यमुखेनालंकारौ रसमुपकुरुतः। चित्ते विहुट्टदि ण खुट्टदि सा गुणेसु सज्जाइ लुट्टदि विसट्टदि
दिम्मुहेसुं। वोल्लम्मि वट्टदि पत्तदि कव्वबंधे झाणेण दुट्टदि चिरं तरुणी तरट्टी। इत्यादौ वाचकमेव। मित्रे क्वापि
गते सरोरुहवने वद्धानने ताम्यति क्रंदत्सु भ्रमरेषु वीक्ष्य दयितासन्नां पुरः सारसीं। चक्राह्वेन वियोगिना विशलता
नास्वादिता नोज्झिता वक्त्रे केवलमर्गले व निहिता जीवस्य निर्गच्छतः। इत्यादौ काव्यमेव न तु रसः। अत्र विशलता
जीवरोहं न क्षमेति प्रच्छन्नानन्तगुणोपमा। एष एव च गुणालंकारप्रविभागः। एवं च समवायवृत्त्या शौर्यादयः।
संयोगवृत्त्या तु हारादय इत्यस्तु गुणालंकाराणां भेदः। ओजः प्रभृतीनां अनुप्रासोपमादीनां चोभयेषामपि स
मवायवृत्त्या स्थितिरिति गड्डुरिकाप्रवाहेणैषां भेद इत्यभिधानमसत्यदप्युक्तं। काव्यशोभायाः कर्तारो धर्मा गु
णास्तदतिशयहेतवस्त्वलंकारा इति तदपि न युक्तं। यतः किं समस्तैर्गुणैः काव्यव्यवहारः। उत कतिपयैर्यदि सम
स्तैस्तत्कथमसमस्तगुणा गौडी पांचाली च रीतिः काव्यस्यात्मा। अथ कतिपयैस्ततः अद्रावत्र प्रज्वलत्यग्निरु
च्चैः प्राग्यः प्रोद्यन्नुल्लसत्येष धूम इत्यादावोजः प्रभृतिषु गुणेषु सत्सु काव्यव्यवहारः प्राप्तः। स्वर्गप्राप्तिरनेनै

वदेहे नवरवर्णिनी। अस्यार दच्छदरसो न्यक्करोति तरां सुधामित्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहा
रप्रवर्त्तकौ। इदानीं गुणानां भेदमाह। माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश॥ एषां क्रमेण लक्षमाह। आल्हाद
कत्वं माधुर्यं शृंगारे द्रुतिकारणं। शृंगारे संभोगे द्रुतिर्गलितत्वमिव। अन्यत्तु पुनरोजःप्रसादयोरपि। करुणे विप्रलंभे
त च्छांते चातिशयान्वितं। अत्यंतद्रुतिहेतुत्वात्। दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः। चित्तस्य विस्ताररूपदीप्त
त्वमोजः। वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण वा। वीराद्वीभत्से ततो पि रौद्रे सातिशयमोजः। शुष्केंधनाग्निवत्स्वच्छजल
वत्सहसैव यः। व्याप्नोत्यन्यत्प्रसादो सौ सर्वत्र विहितस्थितिः। अन्यदिति व्याप्यमिह चित्तं। सर्वत्रेति सर्वेषु रसेषु सर्वासु रच
नासु वा। गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता। गुणवृत्त्या उपचारेण तेषां गुणानां। आकारे शौर्यस्येव। कुतस्त्रय एव
न दशेत्याह। केचिदंतर्भवंत्येषु दोषत्यागात्परे श्रिताः। अन्ये भजंति दोषत्वं कुत्रचिन्न ततो दश। बहूनामपि पदाना
मेकपदवद्भासनात्मा श्लेषो यश्चारोहावरोहक्रमरूपः समाधिर्यश्च विकटत्वलक्षण उदारता। यश्चौजोमिश्रित
शैथिल्यात्मा प्रसादस्तेषामोजस्यंतर्भावः। पृथक्पदत्वरूपं माधुर्यं भंग्या साक्षादुपात्तं प्रसादेनार्थव्यक्तिर्गृहीता मार्गाभे
दरूपा समता क्वचिद्दोषः। तथाहि मातंगाः किमु वल्गितैरित्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः। कष्टत्वग्राम्य
त्वयोर्दुष्टताभिधानात्तन्निराकरणेन पारुष्यरूपं सौकुमार्यमौज्ज्वल्यरूपा कांतिश्च स्वीकृता। एवं न दश शब्दा गुणाः।

८

पदार्थेवाक्यरचनंवाक्यार्थेचपदाभिधा।प्रौढिर्व्याससमासौवेतियाप्रौढिरोजस्त्युक्तंतदैचित्र्यमात्रं।नगुणस्तद
भावेपिकाव्यव्यवहारप्रवृत्तेः।अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामंगलरूपाश्लीलग्राम्यरूपाणांनि
राकरणेनचसाभिप्रायत्वरूपमोजोर्थवैमल्यात्माप्रसादउक्तिवैचित्र्यरूपंमाधुर्यमपारुष्यरूपंसाकु
मार्यमग्राम्यत्ववपुरुदारताचस्वीकृतानि।अभिधास्यमानस्वभावोक्त्यलंकारेणरसध्वनिगुणीभूतव्यंग्या
भ्यांचवस्तुस्वभावस्फुटत्वरूपार्थव्यक्तिर्दीप्तरसत्वरूपाकांतिश्चस्वीकृते।क्रमकौटिल्यानुल्बणत्वोपपत्ति
योगरूपघटनात्माश्लेषोविचित्रत्वमात्रं।अवैषम्यरूपासमतादोषाभावमात्रंनपुनर्गुणः।कःखल्वनुन्मत्तो
रन्यप्रस्तवेरन्यदभिध्यात्।अर्थस्यायोनेरन्यच्छायायोनेर्वायदिनभवतिदर्शनेतत्कथंकाव्यमित्यर्थदृष्टि
रूपःसमाधिरपिनगुणः।तेननार्थगुणावाच्याःप्रोक्ताःशब्दगुणास्त्रयः।वर्णाःसमासोरचनातेषांव्यंजकता

ज्यो

मिताः।केकस्येत्याह।मूर्ध्निवर्गांत्यगास्पर्शाअटवर्गारणौलघू।अवृत्तिर्मध्यवृत्तिर्वामाधुर्येघटनातथा।।
टठडढवर्ज्याःकादयोमांताः।।शिरसिनिजवर्ग्यांत्ययुक्तास्तथापरेणकारोह्रस्वांतरितौविनिवर्णौ।समा
साभावोमध्यमःससमासोवेतिसमासः।तथामाधुर्यवतिपदांतरयोगेरचनामाधुर्यस्यव्यंजिका।उदा०।अनं
गरंगप्रतिमंतदंगंभंगीभिरंगीकृतमानताग्याः।कुर्वंतियूनांसहसायथैताःस्वांतानिशांतापरचिंतनानि।यो

८६

92

गस्याद्यतृतीयाभ्यामन्त्ययोरेणतुल्ययोः।टादिःशषौवृत्तिदैर्घ्यंगुंफउद्धतओजसि।वर्गप्रथमतृतीयाभ्यांद्वितीयच
तुर्थयोरेफे[illegible]णाधउपर्युभयत्रवायस्यकस्यचित्तुल्ययोस्तेनतस्यैवसंबंधः।टवर्गोणकारवर्ज्यः।शकारष
कारौदीर्घःसमासोविकटासंघटनाओजसु।उदा०मूर्ध्नामुद्वृत्तकृत्तेत्यादि।श्रुतिमात्रेणशब्दानांयत्रार्थप्र
त्ययोभवेत्।साधारणःसमग्राणांसप्रसादोगुणःमतः।समग्राणांरसानांसमासानांसंघटनानांच।उदा०परिम्लानं
पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतःपरिमिलनमप्राप्यहरितं।इदंव्यस्तन्यासंश्लथभुजलताक्षेपवलनैः
कृशांग्याःसंतापंवदतिबिसिनीपत्रशयनं।यद्यपिगुणपरतंत्राःसंघटनादयस्तथापि।वक्तृवाच्यप्रबंधानामौचित्ये
नक्वचित्कचित्रचनावृत्तिवर्णानामन्यथात्वमपीष्यते।क्वचिद्वाच्यप्रबंधानपेक्षयावक्त्रौचित्यादेवरचनादयः
यथा।मंथायस्तार्णवांभःप्लुतकुहरचलन्मंदरध्वानधीरःकोणाघातेषुगर्जत्प्रलयघनघटान्योन्यसंघट्टचंडः।
कृष्णाक्रोधाग्रदूतःकुरुकुलनिधनोत्पातनिर्घातवातःकेनास्मत्सिंहनादप्रतिरसितसखोदुंदुभिस्ताडितोयं॥
अत्रनहिवाच्यंक्रोधादिव्यंजकं।अभिनयार्थंचकाव्यमितितत्प्रतिकूलाउद्धतारचनादयः।वक्ताचात्रभी
मसेनः।क्वचिद्वक्तृप्रबंधानपेक्षयावाच्यौचित्यादेवरचनादयः।यथा।प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिके

योपघातत्रासात्कष्टानि तिर्यग्वलितारविरथेनारुणेनेष्टमानं। कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कंधरारंध्रभाजां
झांकारैर्भीममेतन्निपतति वियतः कुंभकर्णोत्तमांगं। क्वचिद्वक्तृवाच्यानपेक्षया प्रबंधोचितेति तथाख्यायिकायां
शृंगारेपि नमसृणा वर्णाः। कथायां रौद्रेपि नात्यंतमुद्धताः। नाटकादौ रौद्रेपि न दीर्घसमासादयः। एवमन्यदप्यौ
चित्यमनुसर्तव्यं॥ इति काव्यप्रकाशे गुणालंकारभेदनियतगुणनिर्णयो नामाष्टमउल्लासः॥ ॥गुणविवे
चनेकृते अलंकाराः प्राप्तावसरा इति संप्रति शब्दालंकारानाह॥ यदुक्तमन्यथा वाच्यमन्यथान्येन योज्यते। श्लेषेन
काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥ तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च। तत्र पदभंगश्लेषेण यथा। नारीणाम
नुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति हितकृन्नैवावलानां भवान्। युक्तं किं हितकर्तनं
ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरंदरमतच्छेदं विधातुं कुतः। अभंगश्लेषेण यथा॥ अहो केनेदृशी बुद्धि
र्दारुणा तव निर्मिता॥ त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्। काक्वा यथा। गुरुपरतंत्रतया बत दूरं देशमुद्यतो ग
न्तुं। अलिकुलकोकिलललिते नैष्यति सखि सुरभिमयेसौ॥ वर्णसाम्यमनुप्रासः। स्वरवैसादृश्येपि व्यंजनसदृश
त्वं वर्णसाम्यं। रसाद्यनुगुणः प्रकृष्टो न्यासोनुप्रासः। छेकवृत्तिगतो द्विधा। छेका विदग्धास्तेषां वृत्तिर्नियतवर्णगतो रस

वा

घा

त

५७

विषयोव्यापारः। गतइतिच्छेकानुप्रासोवृत्त्यनुप्रासाख्यौ। किंतयोःस्वरूपमित्याह। सोनकस्यार्थोव्यंजनस्यसकृदे
कवारंसादृश्यंछेकानुप्रासः। उदा०। ततोरुणपरिस्पंदमंदीकृतवपुःशशी। दध्रेकामपरिक्षामकामिनीगंडपांडु
तां। एकस्याप्यसकृत्परः। एकस्यापीत्यपिशब्दादनेकस्यव्यंजनस्यद्विर्बहुकृत्वोवासादृश्यंवृत्त्यनुप्रासः।
तत्रमाधुर्यव्यंजकैर्वर्णैरुपनागरिकेष्यते। ओजःप्रकाशकैस्तैस्तुपरुषाउभयत्रापिग्राम्युदाहृता। कोमलापरैः॥
परैःशेषैस्तामेवकेचिद्ग्राम्येतिवदंति। उ०। अपसारयघनसारंकुरुहारंदूरएवकिंकमलैः। अलमलमालिमृ
णालैरितिवदतिदिवानिशंबाला। केषांचिदेतावैदर्भीप्रमुखारीतयोमताः। एतास्तिस्रोवृत्तयोवामनादीनां
मतेवैदर्भीगौडीपांचाल्याख्यारीतयउच्यंते। शाब्दस्तुलाटानुप्रासोभेदेतात्पर्यमात्रतः। शब्दगतोनुप्रासःशब्दा
र्थयोरभेदेपितात्पर्यमात्रभेदाल्लाटजनवल्लभत्वाल्लाटानुप्रासः। एषपदानुप्रासइत्यन्ये। पदानांसः। सइ
तिलाटानुप्रासः। उदा०। यस्यनसविधेदयितादवदहनस्तुहिनदीधितिस्तस्य। यस्यचसविधेदयितादवदहन
स्तुहिनदीधितिस्तस्य। पदस्यापि। अपिशब्देनसमासःसमुच्चीयते। उदा०। वदनंवरवर्णिन्यास्तस्याःसत्यंसुधाक
रः। सुधाकरःक्वनुपुनःकलंकविकलोभवेत्। वृत्तावन्यत्रतत्रवानाम्नःसवृत्त्यवृत्त्योश्च। एकस्मिन्समासेभि

तो

न्नेवासमासे समासासमासयोर्वा तां। प्रातिपदिकस्य नत्नुपदस्य सारूप्यं। उदा०। सितकरकररुचिरविभा विभाक
राकारधरणिधवकीर्त्तिः। पौरुषकमला कमला सापि तवैवास्ति नान्यस्य। तदेवं पंचधा मतः। अर्थे सत्यर्थभिन्ना
नां वर्णानां सा पुनः श्रुतिः। यमकं। समरसमरसोयमित्यादौ केषांमर्थवत्त्वेन्येषामनर्थकत्वे भिन्नार्थानामिति न युक्त
तेवक्तुमित्यर्थे सतीत्युक्तं सेति सरोरस इत्यादि वैलक्षण्यं नत्ते नैवक्रमेणास्थिता। पादतद्भागवृत्ति तद्यात्यनेकतां॥
प्रथमो द्वितीयादौ द्वितीयस्तृतीयादौ तृतीयश्चतुर्थे प्रथमस्त्रिष्वपीति सप्त। प्रथमश्चतुर्थे द्वितीयस्तृतीय इति।
पुनः प्रथमो द्वितीये स्तृतीयश्चतुर्थे इति द्वे। तदेवं पादजं नवभेदं। अर्द्धावृत्तिः श्लोकावृत्तिश्चेति द्वे। द्विधा विभक्ते
पादे प्रथमादिपादादिभागः पूर्ववद्द्वितीयादिपादादिभागेष्वंतभागोंत्यभागेष्विति विंशतिर्भेदाः। श्लोकांतरे हि न भा
गावृत्तिः। त्रिखंडे त्रिंशत्। चतुःखंडे चत्वारिंशत्। प्रथमपादादिगतांत्यार्द्धादिभागो द्वितीयपादादिगते आद्यर्द्धा
दिभागे यस्य त इत्याद्यन्वर्थतानुसरणे नानेकभेदं अंतादिकमाद्यंतकतासमुच्चयः। मध्यादिकमादिमध्यांतम
ध्यमध्यांतिकं तेषां समुच्चयस्तथा तस्मिन्नेव पादे आद्यादिभागानां मध्यादिभागेष्वनियतेवस्थाने आवृत्तिरिति
प्रभूततमभेदं। तदेतत्काव्यगुरुभूतमिति नान्यस्य भेदलक्षणं कृतं दिङ्मात्रं तूदाह्रियते। सन्नारीभरणोमायमा

५८

९६

राध्यविधुशेखरं। सन्नारीभरणोमायस्ततस्त्वं पृथिवीजय॥ विनायमेनोनयतासुखादिना विनायमेनोनयतासु
खादिना। महाजनोदीयतमानसादरं महाजनोदीयतमानसादरं॥ सत्तारंभरतोवश्यमवलवित्ततारवं। सर्वदा
रणमानैषीदवानलसमस्थितिः॥ श्लोकावृत्तिभेदः। अनंतमहिमव्याप्तविश्वांवेधनवेदयां। याचमातेवभजते
प्रणतेमान्वेद्यां। यदानतोयदानतोनयात्ययं नयात्ययं। शिवेहितां शिवेहितां स्मरामितां स्मरामितां। सरस्व
तिप्रसादेमे स्थितिं चित्तसरस्वति। सरस्वति कुरुक्षेत्रकुरुक्षेत्रसरस्वति॥ ससारसाकं दर्पेण कंदर्पेण ससारसाशा
रन्नवानाविश्राणनाविश्राणाशारन्नवा॥ मधुपराजिपराजितमानिनी जनमनः सुमनः सुरभिश्रियं। अरंटतवा
रितवारितवारिविलवंस्फुटितामतताम्रवणंजगाम। एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयं। वाच्यभेदेन भिन्नाय
द्युगपद्भाषणस्पृशः। श्लिष्यंतिशब्दाः श्लेषोसावक्षरादिभिरष्टधा। अर्थभेदेनशब्दभेदइतिदर्शने काव्यमार्गेस्वरोन
गण्यतइतिचदर्शनेवाच्यभेदेनभिन्नाअपिशब्दायद्युगपदुच्चारणेनश्लिष्यंतिभिन्नंस्वरूपमपद्रुवते सश्लेषः।स
चवर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनानांभेदादष्टधा। क्रमेणोदा०। अलंकारः शंकाकरनरकपालंप
रिकरो विशीर्णांगो भंगीवसुचवृषएकोवहुवयाः अवस्थेयंस्थाणोरपिभवतिसर्वामरगुरोविधौवक्रे मूर्ध्निस्थित
वतिवयं के पुनरमी॥ पृथुकार्तस्वरपात्रंभूषितनिःशेषपरिजनंदेवविलसत्करेणुगहनंसंप्रतिसममावयोः सदनं॥

श्लेषः। प्रमातसंध्येवास्वापफललुब्धेहितप्रदेति सभंगः शब्दश्लेषश्चेति द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि श
ब्दश्लेषत्वमुपपन्नं तत्राद्यस्यार्थश्लेषत्वे। अर्थश्लेषस्य तु सविशेषाय यत्र शब्दपरिवर्तनेपि न श्लेषत्वखंडना यथा॥
स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं। अहो सु[illegible]सदृशी वृत्तिस्तुलाकोटेः खलस्य चेति। न चायमुपमाप्र
तिभोत्पत्तिहेतुः श्लेषापि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथाहि॥ यथा कमलमिव मुखं मनोज्ञमेतत्कचाति नरामित्या
दौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये चोपमा तथा सकलकलं पुरमेतज्जातं संप्रति शीतांशुबिंबमिवेत्यादौ शब्दमात्रसा
म्येपि पूर्णैव॥ तथा ह्युक्तं रुद्रभट्टेन। न स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु। आश्रित्य शब्दमात्रं सामान्यमिहापि
संभवत इति। न च कमलमिव मुखमित्यादिः साधारणधर्मप्रयोगशून्य उपमाया विषय इति वक्तुं युक्तं। श्लेषोपमाया नि
र्विषयत्वापत्तेः देवत्वमेव पातालमाशानां त्वं निबंधनं। त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः इत्यादिश्लेषस्य चोपमा
द्यलंकारविविक्तोस्ति विषय इति द्वयोर्योगे संकर एवोपपत्तिपर्यालोचनेनोपमाया एवायं युक्तो विषयोन्यथा विषया
पहार एव पूर्णोपमायाः स्यात्। न त्वत्र बिन्दुसुन्दरी नित्यं गलल्लावण्यबिंदुकेत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषापि तु श्ले
षप्रतिभोत्पत्तिहेतुर्विरोधः। न ह्यनयोर्द्वयप्रतिपादकशब्दश्लेषो द्वितीयार्थस्य प्रतिभामात्रस्य प्ररोहाभावात् अन्यत्र विरोधा
भास इव विरोधः श्लेषाभासः श्लेषः। तस्मादेवमादिवाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलंकारांतरमेव तथा च सद्देशमुक्तामणिः॥

नाल्पः कविरिव स्वल्पश्लेषो कौ देव महान् भवान्॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः। अहो दैवगतिश्चित्रा तथापि न स
मागमः। आराधयन् चापसमवलेकत्वाहीनेगुणं विषमदृष्टिः। यश्चित्रमच्युतशरो लक्ष्यमभांक्षीन्नमस्तस्मै दुह्यियादोवक
देशाविवर्त्तिरूपकव्यतिरेकसमासोक्तिविरोधत्वमुचितं न तुश्लेषत्वं शब्दश्लेष इति वोच्यते तथालंकारमध्ये वललक्षण
तेरिति कोऽयं नयः। किंच वैचित्र्यमलंकार इति य एव कविप्रतिभासंरंभगोचरस्तत्रैव चित्रतेति सैवालंकारभूमिः। अर्थ
मुखप्रेक्षितमेतेषां शब्दानामिति चेदनुप्रासादीनामपि तथैवेति तेप्यर्थालंकाराः किं नोच्यते रसादिव्यंजकस्वरू
पवाच्यविशेषसव्यपेक्षत्वे ह्यनुप्रासादीनामलंकारता। शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता। अर्थगुण
दोषालंकाराणां शब्दापेक्षयैव स्थितिरीति तेऽपि शब्दगतत्वेनोच्यतां विधौ वक्रे मूर्ध्नि इत्यादौ च वर्णादिश्लेषे एकप्रयत्नो
च्चार्यत्वेऽर्थश्लेषत्वं शब्दभेदेऽपि प्रसजतीत्येवमादि स्वयं विचार्यं। तच्चित्रं यत्र [illegible] वर्णानां खड्गाद्याकृति हेतुता। संनिवे
शविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यं। कष्टकाव्यमेतदिति दिङ्मात्रं प्रदर्श्य
ते। उदा०। मारारिशक्ररामेभमुखैरासाररंहसा। साराराब्धस्तवा नित्यं तदार्तिहरणक्षमा॥ माता नतानां संघट्टः श्रियां बाधि
तसंभ्रमा। मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा॥ खड्गः॥ सरला बहुलारंभतरलालिबलारवा। वारला बहु
लामंदकरा लावकुला मला॥ मुरजबंधः॥ भासते प्रतिभासाररसाभाताहताविभा। भावितात्मा शुभा वादे देवाभा बत ते

५०

तेसभापद्मबंधः। भरसाररसारसयताक्षक्षतायसा। सातावाततवातासा रक्षतस्त्वस्त्वतक्षरा। सर्वतोभद्रः। संभवि
नोप्यन्ये प्रभेदाः। शक्तिमात्रप्रकाशकानतु काव्यस्वरूपतां दधातीतिन प्रदर्श्यते। पुनरुक्तवदाभासो विभिन्नाका
रशब्दगा। एकार्थतेव शब्दस्याभिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वेनेवामुखेभासनं पुनरुक्तवदाभासः। सच
शब्दस्य सभंगाभंगरूपकेवलशब्दनिष्ठः। उदा०। अरिवधदेहशरीरः सहसाश्विसततुरगपादातः। भातिसदानत्यागः
स्थिरतायामवनितलतिलकः। चकास्त्यंगनारामाः कौतुकानंदहेतवः। तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः॥
तथा शब्दार्थयोरयं। उदा०। तनुवपुरजघन्योसौ करिकुंजररुधिररक्तखरनखरः। तेजोधाममहः पृथुमनसामिंद्रो हरि
जिष्णुः। अत्रैकस्मिन्पदे परिवर्तिते नालंकार इति शब्दाश्रयः परस्मिंस्तु परिवर्तितेपि न हीयत इत्यर्थनिष्ठ इत्युभयालं
कारोयं। इति काव्यप्रकाशे शब्दालंकारनिर्णयो नाम नवमउल्लासः॥ ॥अथार्थालंकारानाह। साधर्म्यमुपमा

मा

भेदे। उपमानोपमेययोरेव नकार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण संबंध उपमा। भेदग्रहणमन
न्वयव्यवच्छेदाय। पूर्णा लुप्ता च। उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा। एकस्य द्वयोस्त्र
याणां वा लोपे लुप्ता। साग्रिमा श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा। अग्रिमा पूर्णा। यथेववाशब्दाः यत्पराः तस्यै
वोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्संबंधं प्रतिपादयंति

श्री

श्रौती

इति तत्सम्भावेश्रोतोउपमा। तथैवतन्न तस्यैवेत्यनेन इवार्थे विहितस्य वतेरूपादानेति न तुल्यमित्यत्र तु उपमेय एव तत्तुल्यम
स्येत्यादौ वोपमान एव। इदं च तत्तत्तुल्यमित्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यता प्र
तीतिरिति। तत्र साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादानेनार्थी। तदुक्तं न तुल्यमित्यादिना विहितस्य वतेः स्थितौ। इवेन
नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति नित्यसमासइवशब्दयोगे समासगा। क्रमेणोदा०। स्वभ्रेपि स
मेरषु लांघिजयश्रीर्न मुंचति। प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा। चकितहरिणलोललोचनायाः क्रुधि तरुणा
रुणतारहारकान्ति। सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते। अत्यायतैर्नियमकारिभिरुद्धतानां दि
व्यैः प्रभादिभिरनायमयैरुपायैः। शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार। अवितथमनो
रथपथप्रथनेषु गुणगरिमगीतश्रीः। सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य॥ गांभीर्यगरिमा त
स्य सत्यं गंगाभुजंगवत्। दुरालोकः स समरे निदाघांबररत्नवत्। स्वाधीनभर्तृका कान्तं भजमाना यथा लोकोत्तरचमत्का
रभूस्तथा जयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तिवैचित्र्यं वैचित्र्यं चालंकारस्तथापि
न ध्वनिगुणीभूतव्यंग्यव्यवहारः। न खलु व्यंग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिरपि तु वाच्यवैचित्र्यप्रतिभासा
देव। रसादिरूपस्तु व्यंग्योऽर्थोऽलंकारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलंकारादिरुदाहृताः। तद्रहितत्वे

ष

त्तदाक्रीयमाणे विरतामाव हंतीति तिश्चवीपरविरुद्धाभिधानमितिन चोदनीयं ॥ तद्धर्मस्यलोपस्यात्त्रयोतीता द्धितेपुनः

धर्मः साधारणः ॥ तद्धिते कल्पवादेत्तार्थ्येवतेन पंच ॥ उदा० धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ॥ करणीयं

वचश्चेतः सत्यंतस्यामृतंयथा ॥ आकृष्टकरवालोसौसंपरायेपरिभ्रमन् ॥ प्रत्यर्थिसेनयादृष्टः कृतांतेनसमप्रभुः

करवालइवाचारस्तस्यवागमृतोपमा ॥ विकोशं त्वंमनो वेत्सि यदि जीवासितत्सखे ॥ उपमानानुपादाने वाक्यगाथसे

मासगा ॥ [illegible] सअलकरणपरवीसामासिरिवियरणं णसरसकव्वस्स ॥ दीसइ अह वाणिसमुद्द इसरिसं अंसं समेते

ण ॥ कव्वस्सेत्यत्र कव्वसमं इतिसरिसमित्यत्र चरणमितिपाठे एषैवसमासगा ॥ वादेर्लोपे समासे साकर्मधारक्यविवक्

ङि ॥ कर्मकर्त्रोर्णमुलिवा ॥ वाशब्दउपमाद्योतक इतिवादेरुपमाप्रतिपादकस्यलोपेषट् ॥ कर्मणोधिकरणाच्चोत्पन्ने नक्य

वाक्तुं ः क्यङ् च कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ॥ उदा० ततः कुमुदनाथेन कामिनीगंडपांडुना नेत्रानंदे

नचंद्रेणमाहेंद्रीदिगलंकृता ॥ तथा ॥ आसितभुजगभीषणासिपत्रो रुहिरुहिकाहितचित्रतूर्णचारः ॥ पुलकिततनुरुत्क

पालकांतिः प्रतिभटविक्रमदर्शनेयमासीत् ॥ पौरंसुतीयतिजनं समरांतरेसावंतःपुरीयतिविचित्रचरित्रचंचुः ॥ नारीय

तेसमरसीम्नि कृपाणपाणेरालोक्यतस्यचरितानिसपत्नसेना ॥ ध्वेनिहाघयमींश्रुदर्शपस्यातितंपदे ॥ सपुनः पार्थसंचारंसं

चरंत्यवनीपतिः ॥ एतद्धिलोपे ॥ क्विपसमासगा ॥ एतयोर्द्वयोर्धर्मवाद्योः ॥ उदा० सवितविधवति विधुरपिसवितरति तथा

102

दिनं तियामिन्यः। यामिनयंति दिनानि वसुखदुःखवशीकृते मनसि। परिपंथिमनोराज्यं शतैरपि दुराक्रमः। संपरायप्रवृत्तो सौराजते राजकुंजरः। धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते। दुंढलत्तामरीहासिके॥ अकलिआंइके त्वइवणा इं। मालइ कुसुमसरिछंभमरभमतोणयाविदिसि। कुसुमेणसमं इति पाठे वाक्यगा। काविवाद्युपमेयासे। आसेनिरासे। अरातिविक्रमालोकविकस्वरविलोचनः कृपालोदयदोर्दंडसमद्दस्वायुधीयति। अत्रात्माउपमेयः। त्रिलोपे च समासगा। त्रयाणां वादिधर्मोपमानानां उदा॰ तरुणिमणिकृतावलोकनाललितविलाससविलव्ध्वविग्रहा। स्मरशरविसरास्तिमनिता मृगनयनाहरते मुनेर्मनः। अत्र त्रससमस्युपमानेत्यादिना पदसमासलोपोकूरस्यारस्यायः। श्यलतयाध्यवसानादयः श्लेनान्विछति। आयः श्लिक इत्यतिशयोक्तिर्नतु कूराचारोपमेयते क्षायधर्मे वादीनां लोपे त्रिलोप्यमुपमा॥ एवमेको नविंशतिर्लुप्ताः पूर्णाभिः सन्पंचविंशतिः॥ अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विना। मम्लौ साथ विषादेन पद्मिनीव हिमांभसा॥ इत्यभिन्ने साधारणे धर्मे॥ ज्योत्स्नेव नयनानंदः सुरेव मदकारणं प्रभुत्वमिव समाकृष्टसर्वलोका नितंबिनी। तिभिन्ने वा तस्मिन्नेकस्यैव बहूपमानोपादाने मालोपमा। यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्ने भिन्ने धर्मत्वे। अनवरतकनकवितरणजललवभृतकरतरंगितार्थिततेः। भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला। मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता। तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषां मित्यादिका रसनोपमा च न लक्षिता॥

ना

५२

एवं वैचित्र्यस्य सत्त्वसंभवाद् उक्तमेतन्नातिक्रमात्। उपमानोपमेयत्वे एकस्यैवैकवाक्यगे अनन्वयः। उपमानांतरसंबंधाभावोऽ
नन्वयः। उदा०। न केवलं भाति नितांतकीर्तिर्नितंबिनीसेव नितंबिनीवा। यावद्विलासायुधलासवासा सेत द्विलासा इव त
द्विलासाः। विपर्यास उपमेयोपमा तयोः। तयोरुपमानोपमेययोः परिवृत्तिरर्थाद्वाक्यद्वये इतरोपमानव्यवच्छेदपरा उपमे
येनेउपमा इत्युपमेयोपमा। उदा०। कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः। धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य। संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्। समेनोपमानेन। उदा०। उन्मेषं यो मम न सहते जातिवैरी नि
शायामिन्दोरिंदीवरदलदृशा तस्य सौन्दर्यदर्पः। नीतः शांतिं प्रसभमनया वक्त्रकांत्येति हर्षाल्लग्ना मन्ये ललिततनु
ते पादयोः पद्मलक्ष्मीः। लिंपतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसेवेव दृष्टिर्निःफलतां गता॥ इत्यादौ व्याप
नादिलेपनादिरूपतया संभावितं। ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः। भेदोक्तौ यथा। अयं मार्तंडः किं स खलु तुरगैः
सप्तभिरितः कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतं। कृतांतः किं साक्षान्महिषवहनोसाविति चिरं समालोक्या
जौ त्वां विदधति विकल्पान् प्रतिभटाः। भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो यावन्निश्चयांतोपि संदेहः स्वीकृतः॥
इंदुः किं क्व कलंकः सरसिजमेतत्किमंबु कुत्र गतम्। ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः॥ किंतु नि

स्वयगर्भइवनात्रनिश्चयःप्रतीयमानइत्युपेक्षितोभेदोभ्रंशेन।तदनुक्तौयथा॥अस्याःसर्गविधौप्रजापतिरभूच्चन्द्रोनुकां
तिप्रदःशृंगारैकरसःस्वयंनुमदनोमासोनुपुष्पाकरः।वेदाभ्यासजडःकथंनुविषयव्यावृत्तकौतूहलोनिर्मातुंप्रभवेन्मनो
हरमिदंरूपंपुराणोमुनिः॥तद्रूपकमभेदोयमुपमानोपमेययोः॥अतिसाम्यादनपह्नुतभेदयोरभेदः।समस्तवस्तुविषयंश्रौ
तात्र्यारोपितायदा।आरोपविषयाइवारोप्यमाणाद्यःशब्दोपात्तास्तदासमस्तानिवस्तूनिविषयोयस्येतिसमस्तवस्तु
विषयं।आरोपिताइतिबहुवचनमविवक्षितं।यथा॥ज्योत्स्नाभस्मच्छुरणधवलाबिभ्रतीतारकास्थीन्यंतर्द्धानव्यसनरसिकारा
त्रिकापालिकीयं।द्वीपाद्द्वीपंभ्रमतिद[illegible]तीचंद्रमुद्राकपालेन्यस्तंसिद्धांजनपरिमलंलांछनस्यच्छलेन॥अत्रपादत्रये
अंतर्द्धानरसिकत्वमारोपिधर्मएवेतिरूपकपरिग्रहेसाधकमस्तितत्संकराशंकानकार्या।अथवान्यस्तंलांछनमंजनंकुमुदिनी
प्रोल्लाससिद्धिप्रदमितिचतुर्थःपादएवरूपकेनैवनिर्वाह्यः।श्रौतार्थाश्चतेयस्मिन्नेकदेशविवर्तितत्र।केचिदारोप्यमाणाः
शब्दोपात्ताःकेचिदर्थसामर्थ्यादवसेयाइत्येकदेशविवर्तनादेकदेशविवर्तियथा।जस्सरणंतेउरएकरेकुणंतस्समंडलग्गल
अं।रससम्मुहीविसहसापरम्मुहीहोइरिउसेणा॥अत्ररणस्यांतःपुरत्वमारोप्यमाणंशब्दोपात्तं।मंडलाग्रलतायानायिका
त्वंरिपुसेनायाश्चप्रतिनायिकात्वमर्थसामर्थ्यादवसीयतइत्येकदेशविशेषणवर्तनादेकदेशविवर्ति।सांगमेतत्॥
उक्तंद्विभेदंसावयवं॥निरंगंतुशुद्धं।यथा॥कुरंगीवांगानिस्तिमितयतिगीतध्वनिषुयत्सखींकांतोदंतंश्रुतमपिपुनः

प्रस्मयतियत्र।अनिद्रं यच्चांतःस्वपितितदहोवेद्म्यभिनवं प्रवृत्तोस्याःसेक्तुं हृदिमनसिजः प्रेमलतिकां।मालातु एकैवेत्।।
मालोपमायामिवैकस्मिन्निह बहवस्त्वारोपिताः।यथा।सौंदर्यस्यतरंगिणीतरुणिमोत्कर्षस्यहर्षोद्गमः।कांतेःकार्मणक
र्मनर्मरहसामासुहृद्वासनावासभूः।विद्यावक्त्रगिरांविधेरनवधिप्रावीण्यसाक्षात्क्रियाप्राणाःपंचशिलीमुखस्यलल
नाचूडामणिःसाप्रिया।।नियतारोपणोपायःस्यादारोपःपरस्ययः।तत्परंपरितंश्लिष्टवाचकेभेदभाजिवा।यथा।विद्वन्मा
नसहंसवैरिकमलासंकोचदीप्तद्युतेदुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानर।।सत्यप्रीतिविधानदक्षविज
यप्राग्भावभीमप्रभोसाम्राज्यंवरवीरवत्सरशतंवैरिंचमुच्चैःक्रियाः।।अत्रमानसमेवमानसंकमलायाःसंकोचएवक
मलानामसंकोचः।दुर्गाणाममार्गणमेवदुर्गायामार्गणं।समितांस्वीकारएवसमिधांस्वीकारः।सत्यप्रीतिरेवसत्या
मप्रीतिः।विजयःपरपराभवएवविजयोर्जुनः।एवमारोपणनिमित्तोहंसादेरारोपः।यद्यपिशब्दार्थालंकारोयमित्युक्तं
वक्ष्यतेच।तथापिप्रसिद्ध्यनुरोधादत्रोक्तः।।एकदेशवृत्तिंहीदमन्यैरभिधीयते।भेदभाजियथा।।आत्मानंजयकुंजरस्य
दृषदंसेतुर्वियद्वारिधेःपूर्वाद्रिःकरवालचंडमहसोलीलोपधानंश्रियः।संग्रामामृतसागरप्रमथनक्रीडाविधौमंदरोरा
जन्राजतिवीरवैरिवनितावैधव्यदस्तेभुजः।।अत्रजयादेर्भिन्नशब्दवाच्यकुंजरत्वाद्यारोपेभुजस्यालानत्वाद्यारोपो
युज्यते।अलौकिकमहालोकप्रकाशितजगत्त्रयः।स्तूयतेदेवसद्वंशमुक्तारत्नंनकैर्भवानिति।।निरवधिचनिराश्रयंचय

स्यास्थितमनिवर्तितकौतुकप्रपंचं ।। प्रथमइहभवान्कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकंदः ।। इति मालारूपकमपि परं
परितं द्रष्टव्यं ।। किशलयकरैर्लतानां करकमलैः कामिनां मनोजयति । नलिनीनां कमलमुखैर्मुखैरिंदुभिर्योषितां मदनः ।।
इत्यादि रसनारूपकं । न वैचित्र्यवदिति न लक्षितं ।। प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः । उपमेयमसत्यं कृत्वोपमा
नं सत्यतया यत्स्थाप्यते सापह्नुतिः । उदा । अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलंको नैवायं विलसति शशांकस्य
वपुषि ।। अमुष्येयं मन्ये विगलदमृतस्यंदशिशिरे रतिश्रांता शेते रजनिरमणी गाढमुरसि । इत्यत्र ।। वत सखि किमिदं तत्प
स्य वैरं स्मरस्य प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि । उपवनसहकारोद्भासिभृंगछलेन प्रतिविषमनेनोदंचितं कालकूटं ।।
अत्र दिन सभृंगानि सहकाराणि पि तु सकालकूटाः शरा इति प्रतीतिः । एवं वा । अमुष्मिन् लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः । यदंगांगाराणां प्रशमपिशुना नाभिकुहरे शिखा धूमस्येयं परिणमति रोमा[illegible]व
लिवपुः ।। अत्र न रोमावलिर्धूमशिखेयमिति प्रतिपत्तिरेवमियं भंग्यंतरैरप्यूह्या ।। श्लेषः स वाक्य एकस्मिन्यत्रानेकार्थता
भवेत् । एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकार्थः स श्लेषः । उदा । उदयमयते दिङ्मालिन्यं निराकुरुतेतरां नयति नि
धनं निद्रामुद्रां प्रवर्तयति क्रियाः । रचयति तरां स्वैराचारप्रवर्तनकर्तनं वत वत लसत्तेजःपुंजो विभाति विभाकरः ।। अत्राभि
धाया अनियंत्रणाद्द्वावप्यर्करूपौ वाच्यौ ।। परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः । प्रकृतार्थप्रतिपादकेन वाक्येन श्लिष्ट

नि

विशेषेणमाहात्म्यान्नतुविशेष्यस्यसामर्थ्यादपियदप्रकृतस्याप्यर्थस्याभिधानंसमासेनसंक्षेपेणार्थद्वयकथनात्समा
सोक्तिः॥उदा॥लादरूणतुरुवाहुप्फंसंजीएसकोविउहत्राँजयलच्छी[illegible]तुहविरहेणहोज्जम्मादुब्बलाणंसा॥यत्र
जयलक्ष्मीशब्दस्यकेवलंकांतावाचकत्वंनास्ति॥निदर्शना॥अभवद्वस्तुसंबंधउपमापरिकल्पकः॥निदर्शनंदृष्टां
तकारणं॥उदा॥क्वसूर्यप्रभवोवंशःक्वचाल्पविषयामतिः॥तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरं॥अत्रउडुपेनसाग
रतरणमिवमन्मत्यासूर्यवंशवर्णनंइत्युपमायांपर्यवस्यति॥यथावा॥उदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नि
यातिचास्तं॥वहतिगिरिरयंविलंबिघंटाद्वयपरिवारितवारणेंद्रलीलां॥अत्रकथमन्यस्यलीलामन्योवहतीतितत्सदृ
शीमित्युपमायांपर्यवसानं॥दोर्भ्यांतितीर्षतितरंगवतीभुजंगमादातुमिच्छतिकरेहरिणांकबिंबं॥मेरुंलिलंघयिषति
ध्रुवमेषदेवयस्तेगुणान्गदितुमुद्यममादधाति॥इत्यादौमालारूपाप्येषाद्रष्टव्या॥स्वस्वहेत्वन्वयस्योक्तिःक्रिययैवदि
सापरा॥क्रिययैवतुस्वरूपस्वकारणयोःसंबंधोयदावगम्यतेसापरानिदर्शना॥यथा॥उन्नतंपदमुपैतियोलघुर्हेलयैव
सपतेदितिब्रुवन्॥शैलशेखरगतोदृषत्कणश्चारुमारुतधुतःपतत्यधः॥अत्रपातक्रिययापतनस्यलाघवेसत्युन्नत
पदप्राप्तिरूपस्यकारणस्यचसंबंधःख्याप्यते॥अप्रस्तुतप्रशंसायासासैवप्रस्तुताश्रया॥अप्राकरणिकस्यार्थ
स्याभिधानेनप्राकरणिकस्याक्षेपोप्रशंसा॥साचकार्येनिमित्तेसा[illegible]मान्येविशेषेप्रस्तुतेसति॥तदन्यस्यव

चस्तुते तुल्यस्येति च यं चथा ॥ तदन्यस्य कारणादेः क्रमेणोदाहरणं ॥ यथा ॥ किं न मिलंति सुंदरि पुनश्चिंतात्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सवाष्पे मयि । लज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन
भाविमरणोत्साहस्तया सूचितः ॥ अत्र प्रस्थानात्किमिति निवृत्तोसीति कार्ये पृष्टे कारणमभिहितम् ॥ राजन्राजसुता
न पाठयति मां देव्योपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते । इत्थं राजशुकस्तवारिभवने
मुक्तोध्वगैः पंजराच्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥ अत्र प्रस्थानोद्यतं भवतं ज्ञात्वा सहसैव त्व
दरयः पलायिता इति कारणे प्रस्तुते कार्यमुक्तं । एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो यन्मुक्तामणि
रित्यमंस्त स जडः शृण्वन्यदस्मादपि । अंगुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः कुत्रोड्डीयगतो ममे
त्यनुदिनं निद्राति नांतः शुचा ॥ अत्र स्थाने जडानां सहजत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः ॥ सुहृ
द्वधूवाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः । स एव पूज्यः स पुमान्स नीतिमान्सुजीवितं तस्य स भाजनं श्रि
यः ॥ अत्र त्वं हत्वा निहत्य नरकासुरवधूनां यदि दुःखं शमयसि ततस्त्वमेव श्लाघ्य इति विशेषप्रकृते सामान्यमुदितं ॥
तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः समासोक्तिः सादृश्यमात्रं च ॥ तुल्यांतरस्य ह्याक्षेपे हेतुः ॥ क्रमेणोदा
हरणं ॥ पुंस्त्वादपि प्रविचलेत्यदि यद्यधोपि यायाद्यदि प्रणयने न महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वमितीदृशीयं

केनापिदिक्प्रकटितापुरुषोत्तमेन॥येनास्यभ्युदितेनचंद्रगमितःक्लांतिंरवौतत्रतेयुज्येतप्रतिकर्तुमेवनपुनस्तस्यैवपा
दग्रहः।क्षीणेनैतदनुष्ठितंयदिततःकिंलज्जसेनोमनागस्त्वेवंजडधामतानुभवतायद्व्योम्निविस्फूर्जति॥आदायवारि
परितःसरितांमुखेभ्यःकिंतावदर्जितमनेनदुरर्णवेन।क्षारीकृतंचवडवादहनेहुतंचपातालकुक्षिकुहरेविनिवेशितंच॥
इयंचक्वापिद्वाच्यप्रतीयमानार्थानध्यारोपेणेवा।तथा।अब्धेरंतःस्थगितभुवनाभोगपातालकुक्षेःपोतोपायाइह
हिबहवोलंघनेविक्रमंते॥अहोरिक्तःकथमपिभवेदेषदैवात्तदानींकोनामस्यादवटकुहरालोकनेप्यस्यकल्पः॥
कापित्वध्यारोपेणयथा।कस्त्वंभोःकथयामिदैवहतकंमांविद्धिशाखोटकंवैराग्यादिववक्षिसाधुविदितंकस्मादिदंक
थ्यते।वामेनात्रवटस्तमध्वगजनःसर्वात्मनासेवतेनच्छायापिपरोपकारकरणेमार्गस्थितस्यापिमे॥क्वचित्त्वंशेष्वध्या
रोपणंयथा।सोश्वैरिमनाविपर्ययविधिस्तत्कर्णयोश्चापलंदृष्टिःसामदविस्मृतत्तत्त्वपरदिक्किंभूयसोनवा।सर्वंविस्मृत
वानसिभ्रमरहेयद्वारणोप्यसावंतःशून्यकरोनिषेव्यतइतिभ्रातःकएषग्रहः॥अत्ररसनाविपर्यासःशून्यकर
त्वंचभ्रमरस्यासेवनेनहेतुःकर्णचापलंहेतुमदः।प्रत्युतसेवनेनिमित्तं॥निगीर्याध्यवसानंतुप्रकृतस्यपरेणयत्॥
प्रस्तुतस्ययदन्यत्वंयद्यर्थोक्तौचकल्पनं।कार्यकारणयोर्यश्चपौर्वापर्यविपर्ययः॥विज्ञेयातिशयोक्तिःसा।उपमानेनां
तर्निगीर्णस्योपमेयस्ययदध्यवसानंसैका।कमलमनंभसिकमलेचकुवलयेतानिकनकलतिकायां।साचसुकुमा

रस्तुभेदोस्तुत्यात्तपरंपराकेयं।अत्रमुखादिकमलादिरूपतयाध्यवसितमु।यच्चतदेवान्यत्वेनाध्यवसीयतेसापरा।यथा।अ
सल्लउल्लणाअंअणविअ्रका।विवत्तणच्छाआ।सामासामसलपआवइणोरेहुच्चिअणहोइ।यद्यर्थस्ययदिशब्देनचेद्
देनवाउक्तौयत्कल्पनमर्थादसंभवितोर्थस्यसातृतीया।यथा।राकायामकलंकंचेदमृतांशोर्भवेद्वपुः।तस्यामुखंतदा
साम्यपराभवमवाप्नुयात्।कारणस्यशीघ्रकारितांवक्तुंकार्यस्यपूर्वमुक्तौचतुर्थी।यथा।हृदयमधिष्ठितमादौमालत्याःकुसु
मचापबाणेन।चरमंरमणीवल्लभलोचनविषयंत्वयाभजता॥प्रतिवस्तूपमातुसा।सामान्यस्यद्विरेकस्ययत्रवाक्यद्वये
स्थितिः॥साधारणोधर्मउपमेयवाक्येचोपमानवाक्येचकथितपदत्वस्यदुष्टतयाभिहितत्वाच्छब्दभेदेनयदुपादीयते।साव
स्तुनोवाक्यार्थस्योपमानत्वात्प्रतिवस्तूपमा।यथा।देवीभावंगमितापरिवारपदंकथंभजत्येषा।नखलुपरिभोगयोग्यंदैव
तरूपांकितंरत्नं॥यदिदहत्यनलोत्रकिमद्भुतंयदिचगौरवमद्रिषुकिंततः।लवणमंबुसदैवमहोदधेःप्रकृतिरेवसतामविषा
दिता।इत्यादिमालाप्रतिवस्तूपमाद्रष्टव्या।एवमन्यत्राप्यनुसर्तव्यं।दृष्टांतःपुनरेतेषांसर्वेषांप्रतिबिंबनं।एतेषांसाधारणधर्मा
दीनां।दृष्टांतोनिश्चयोयत्रसदृष्टांतः।यथा।त्वयिदृष्टएवतस्यानिर्वातिमनोमनोभवज्वलितं।आलोकेहिहिमांशोर्विकस
मे तिकुमुदंकुमुद्वत्याः।एषसाधर्म्येणवैधर्म्येणतु।तवाहवेसाहसकर्मशर्मणःकरंकृपाणांतिकमानिनीषतः।भटाःपरेषांवि
शारुतामगुर्दधत्यवातेस्थिरतांहिरेणवः।सहहिनिस्तुधर्मस्यप्रकृता[illegible]प्रकृतात्मनां।सेवक्रियासुवद्वीषुकारकस्य

६ देवाकर्णयेन येन सहसा यद्यत्समासादितं ७ भवता च कीर्तिरमलाकीर्त्या च लोकत्रयं ८

त्तिदीपकं। प्राकरणिकाप्राकरणिकानामर्थादुपमानोपमेयानां धर्मः क्रियादिरेकवारमेव यदुपादीयते तदेकत्रस्थस्यैव समस्त
वाक्यदीपनाद्दीपकं यथा॥ किवणाणधणं णाआणमणी केसराइ सीहाणं। कुलवालिआण थणा कुत्तो छिप्पंति असुआ
कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकं। यथा॥ स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्।
अंतर्नंदति चुंबितुमिच्छति नवपरिणया वधूः शयने॥ मालादीपकमाद्यं चेद्यथोत्तरगुणावहं। पूर्वेण पूर्वेण वस्तुनोत्तरमु
त्तरं चेदुपक्रियते तन्मालादीपकं। यथा॥ संग्रामांगणसंगतेन भवता चापे समारोपिते संप्राप्तपारंपर्थियो धनिवदेसांमु
ख्यमासादितं। कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं पतेत्वयासितयशस्तेनापि लोकत्रयं॥ नियतानां स
कृद्धर्मः सा पुनस्तुल्ययोगिता॥ नियतानां प्राकरणिकानामेव वा प्राकरणिकानामेव वा। क्रमेणोदा०। पांडुक्षामं वदनं
हृदयं सरसं तवालसं च वपुः। आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः॥ कुमुदकमलनीलनीरजालिर्ललितविला
सजुषोर्दृशोः पुरस्तात्। अमृतममृतरश्मिरंबुजन्म प्रतिहतमेकपदे तदाननस्य॥ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः॥ अ
न्यस्य उपमेयस्य व्यतिरेक आधिक्यं। क्षीणः क्षीणोपि शशी भूयो भूयोपि वर्द्धते सत्यं। विरम प्रसीद सुंदरि यौवनमनिवर्त्ति या
तं॥ इत्यादावुपमानस्योपमेययादाधिक्यमिति। यत्केनचिदुक्तं तदयुक्तं। अत्र यौवनगतास्थैर्यस्याधिक्यं हि विवक्षितं॥
हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते। शब्दार्थाभ्यामथाक्षिप्ते श्लेषे तद्वत्त्रिरष्ट तत्॥ व्यतिरेकस्य हेतुरुपमेयगत

अचिकित्स्यं

मुत्कर्षनिमित्तमुपमानगतं निकर्षकारणं तयोर्द्वयोरुक्तिरेकतरस्य द्वयोर्वानुक्तिरित्यनुक्तित्रयं। एतद्भेदचतुष्टयमुपमा
नोपमेयभावे शब्देन प्रतिपादिते। अर्थेन क्रमेणोक्तौ चत्वार एव भेदाः। आक्षिप्ते चौपम्ये तावन्त एव। एवं द्वादश। एते च श्लेषेपि
भवन्तीति चतुर्विंशतिभेदाः। क्रमेणोदाहरणं। असिमात्रसहायस्य प्रभूततारिपराभवे। अन्यतुच्छजनस्येव न स्मयोस्य महा
तेः। अत्रैव तु च्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वानुपादानेन्यद्भेदत्रयं। एवमन्येष्वपि द्रष्टव्यं॥ अत्रैव शब्दस्य
सम्भावाच्छब्दमौपम्यं। असिमात्रसहायोपि प्रभूतपराभवे। नैवान्यतुच्छजनवत्सगर्वोयं धृतेर्निधिः। तुल्यार्थेतिवति[illegible]त्या
र्थमौपम्यं॥ इयं सुनयना दासीकृततामरसश्रिया। आननेनाकलंकेन जयतीन्दुं कलंकिनं। अत्रेवादितुल्यादिपदविरहादा
क्षिप्तैवोपमा॥ जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविनः। अतिगाढगुणस्यास्य नाब्जवद्भंगुरा गुणाः। अत्र इवार्थे वतिः। गु
णशब्दः श्लिष्टः। अखंडमंडलः श्रीमान् पश्यैष पृथिवीपतिः॥ न निशाकरवज्जातु कलावैकल्यमागतः। अत्र तुल्यार्थे व
तिः। कलाशब्दः श्लिष्टः। यथा वा। हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः। रविवन्न चापि दुःसहकरतापि
तभूः कदाचिदसि। अत्र तुल्यार्थे वतिः। विषमादयश्च शब्दाः श्लिष्टाः। नित्योदितप्रतापेन त्रियामामीलितप्रभः। भास्वतानेन भू
पेन स्वो भास्वानेष विनिर्जितः। अत्र हि आक्षिप्तैवोपमा। भास्वतेति च श्लिष्टः। यथा वा। स्वच्छात्मतागुणसमुल्लासितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्रिमहृद्यगंधं। पूनामतीव पिबतां रजनीषु यत्र तृष्णां जहार मधु नाननमंगनानां। अत्रेवादेस्तुल्यादी

रि

नां च पदानामभावेपि श्लिष्टविशेषणै[illegible]राक्षिप्तमेवोपमा प्रतीयते इति। एवंजातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपा
दाने ऽन्येपि भेदाः संभवंति। ते ऽनयैव दिशा द्रष्टव्याः। निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्तविषयः स
आक्षेपो द्विधा मतः॥ विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीयकार्यस्याशक्यवक्तव्यत्वमिति प्रसिद्धत्वं विशेषं वक्तुं निष
धो निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विविध आक्षेपः। क्रमेणोदा० एए हि किंपि कीए वि कएण णिक्किव भण
मि। अलमहवा अविआरिअकज्जारंभआरिणी मरउ ण भणिस्सं म्॥ ज्योत्स्ना मौक्तिकदाम चंदनरसः शीतांशुकांतिद्र
वः कर्पूरं कदली मृणालवलयान्यंभोजिनीपल्लवं॥ अंतर्मा[illegible]नसमास्त्वया प्रभवता तस्याः स्फुलिंगोत्कर व्यापाराय भवं
ति किमनेनोक्तेन न ब्रूमहे। क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना। हेतुरूपक्रियायाः प्रतिषेधेपि तत्फलप्रकाशनं वि
भावना। यथा। कुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरदष्टापि। परिवर्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा॥
विशेषोक्तिरखंडेषु कारणेषु फलावचः॥ मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः। सा च। अनुक्तनिमित्ता उक्तनि
मित्ता[illegible] अचिंत्यनिमित्ता च। क्रमेणोदा० निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते। श्लथीकृताश्लेष[illegible]रसे भुजंगे च
चाल नालिंगनतोंऽगना सा॥ कर्पूर इव दग्धोपि शक्तिमान्यो जने जने। नमोस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने॥ स एक स्त्री
णि जयति जगंति कुसुमायुधः। हरतापि तनुं यस्य शंभुना न हृतं बलं॥ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः। यथा॥

115

एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्विषां च विदुषां च मृगीदृशां च ॥ तापं समं दसंचरतिं च पुलकश्च शौर्योष्मणा च विनयेन च लीलया
च ॥ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते । यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण वा सम
र्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः ॥ क्रमेणोदाह० ॥ निजदोषावृतमनसामतिसुंदरमेव भाति विपरीतं । पश्यति पित्तोपहतः शशि
शुभ्रं शंखमपि पीतं ॥ सुसितवसनालंकारायां कदाचन कौमुदीमहसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः । तदनुभवतः कीर्तिः केनाप्य
गीयत येन सा प्रियगृहमगान्मुक्ताशंका क्व नासि सुभद्रः ॥ गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते । असंजातकिणस्कंधः सुखं
स्वपिति गौर्गलिः ॥ अहो हि मे बहु पराद्धं मायुषा यत्प्रियं वाच्यमिदं मयेदं । तएव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं
गताः ॥ विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः । वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः ॥ जातिश्चतुर्भिर्जात्या
द्यैर्विरुद्धा स्याद्गुणैस्त्रिभिः क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ॥ क्रमेणोदा० ॥ अभिनवनलिनीकिशलयमृणालवल
याद्यपि दवदहनराशिः ॥ सुभगकुरंगदृशोऽस्या विधिवशतस्त्वद्वियोगविनिपाते ॥ गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगं
भीराः । विश्वंभराप्यतिलघुर्नरनाथ तवान्तिके नियतं ॥ येषां कंठपरिग्रहप्रणयितां संप्राप्य धाराधरस्तीक्ष्णः सोऽप्यनुरज्यते च
किमपि स्नेहं पराप्नोति च । तेषां संगरसंगशक्तमनसां राज्ञां त्वया भूपते पांशूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकं ॥ स्र
जति च जगदिदमवति च संहरति च हेलयैव यो नियतं । अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदं ॥ सततं मुसलासक्ता व
हुतरगृहकर्मघटनया नृपते । द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥ पेशलमपि खलवचनं दहतितरां
मानसं सुतत्त्वविदां । परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति ॥ कोचाद्रिसम्हा मदषत्दृढोसौयन्मा

५८

बालकादेः
एकदेशः

जेनानुर्गलशातपाते। अभून्नवांभोदजन्माभिजातः स भार्गवः सत्यमएवं सर्गः। परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यंतर्जडयति च तापं
च कुरुते॥ अयं वारामेको निलय इति रत्नाकर इति श्रितोस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः। क एवं जानीते निज
करपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिमकरमप्यास्यति मुनिः॥ समदमतंगजमदजलनिस्यंदतरंगिणी परिष्वंगात्। क्षि
तितिलक त्वयि तटयुषि शंकरजूटापगापि कालिंदी॥ स्वभावोक्तिस्तु डिंभादेः स्वक्रियारूपवर्णनं। स्वयोस्तदेकाश्र
ययोः रूपं वर्णः संस्थानं च। उदा। पश्चादंघ्रिप्रसार्य त्रिकनतिविततं द्राघयित्वांगमुच्चैरासाद्याभुग्नकंठो मुखमुरसि सटा धूलिधू
म्रा विधूय। घासग्रासाभिलाषादनवरतचलत्प्रोथतुंडस्तुरंगो मंदं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण॥
व्याजस्तुतिर्मुखे निंदा स्तुतिर्वा रूढिरन्यथा॥ व्याजरूपा व्याजेन वा स्तुतिः। क्रमेणोदा०। हित्वा त्वामुपरोधवंध्यमनसां मन्ये
न मौलिः परो लज्जामज्जनमंतरेण न रमामन्यत्र संदृश्यते। यस्त्यागं तनुते नरां मुखशतैरेत्याश्रितायाः श्रियः प्राप्य
त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः॥ हे हेलाजितबोधिसत्व वचसां किं विस्तरैस्तोयधे नास्ति त्वत्सदृशः परः
परहिताधाने गृहीतव्रतः। तृष्यत्पांथजनोपकारघटनावैमुख्यलब्धायशोभारप्रोद्वहने करोषि कृपया साहाय्यकं
जन्मनः॥ सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं॥ एकार्थाभिधायकमपि सहार्थबलाद्यद्युभयस्यावगमकं सा

सहोक्तिः। यथा। हृदियणिसाहिंदीहरासासदंडासहमणिवलयैर्दिवासधारागलंति। तुहसुरुअविचोयेतीउहि वि
रीयेसहस्रत्तणलदाएदुवलाजीविहासा॥ छत्रस्वासदंडादिगतंदीर्घत्वादिशाब्दंदिवसनिशादिगतंतुसहार्थसाम
र्थ्यात्प्रतिपद्यते॥ विनोक्तिः साविनान्येनयत्रान्यः सन्नचेतरः॥ कचिदशोभनः कचिच्छोभनः। क्रमेणोदा०। अरुचिर्नि
शयाशशिनासापिविनामहत्तमः। उभयेनविनामनोभवः स्फुरितंनैवचकास्तिकामिनोः॥ मृगलोचनया विनाविचित्र
व्यवहारप्रतिभाप्रभावप्रगल्भः। अमृतद्युतिसुंदराशयोयंसुहृदानेनविनानरेंद्रसूनुः॥ परिवृत्तिर्विनिमयोयोर्थानांस्या
त्समासमैः। परिवृत्तिरलंकारः। उदा०। लतानामेतासामुदितकुसुमानांमरुदयंमतंलास्यंदत्वाश्रयतिभृशमामोदमसमं॥
लतास्तस्मैषण्णामहृदशमादायसहसाददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरं। अत्रप्रथमेर्धेसमेनसमस्यद्वि
तीयेउत्तमेनन्यूनस्य॥ नानाविधप्रहरणैर्नृपसंप्रहारेस्वीकृत्यदारुणनिनादवतः प्रहारान्। दृप्तारिवीरविसरेणव
सुंधरेयंनिर्विप्रलंभपरिरंभविधिर्वितीर्णा॥ प्रत्यक्षाइवयद्भावाः क्रियंतेभूतभाविनः। तद्भाविकंभूताश्चभाविनश्चेति
द्वंद्वः भावः कवेरभिप्रायोत्रास्तीतिभाविकं। उदा०। आसीदंजनमत्रेतिपश्यामितवलोचने। भाविभूषणसंभारांसाक्षा
त्कुर्वेतवाकृतिं। अत्राद्येर्धेभूतस्यद्वितीयेभाविनोदर्शनं॥ काव्यलिंगंहेतोर्वाक्यपदार्थता। वाक्यार्थता। यथा॥ वपुः प्रा
दुर्भावादनुमितमिदंजन्मनिपुरापुरारेनप्रायःक्षणमपिभवंतंप्रणतवान्। नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिमान्महेश

अत्रन्यूनेनोत्तमस्य॥४

117

संत्यंतादिदमपराधद्वयमपि। अनेकपदार्थता। यथा। प्रणयिसखीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पह
ननैरपिताम्यतियत्। वपुषिवधायतत्रतवशस्त्रमुपक्षिपतः पततुशिरस्यकांडयमदंडइवैषभुजः। एकपदार्थता। यथा।
भस्मोद्धूलनभद्रमस्तुभवतेरुद्राक्षमालेशुभं हासोपानपरंपरांगिरिसुताकांतालयालंकृतिं। अद्याराधनतोषिते
नविभुनायुष्मत्सपर्यासुखालोकोच्छेदिनिमोक्षनामनिमहामोहेनिधीयामहे। एवमपराधद्वयेएवापरजन्मनोरन
मनं भुजपातेशास्त्रोपक्षेपोमहामोहसुखालोकोच्छेदित्वं च। यथाकेममुक्केरूपेहेतुः। पर्यायोक्तंविनावाच्यवाच
कत्वेनवस्तुयत्। वाच्यवाचकभावविविक्तेनावगमनव्यापारेणयत्प्रतिपादनंतत्पर्यायेणभंग्यंतरेणकथना
त्पर्यायोक्तं। उदा०। यंप्रेक्ष्यचिररूढापिनिवासप्रीतिरुज्झिता। मदेनैरावणमुखेमानेनहृदयेहरेः। अत्रैरावणशक्रौम
दमानमुक्तौजाताविति व्यंग्यमपिशब्देनोच्यते। तेनयदेवोच्यते तदेवव्यंग्यं। यथातुव्यंग्यंनतथोच्यते। यथा। गवि
शुक्ले चलतिदृष्टेगौः शुक्लश्चलतीतिविकल्पोयदेवदृष्टंतदेवविकल्पयतिनतुयथादृष्टंतथा। यतः। अभिन्नंसंसृष्टमे
नदृष्टंभेदसंसर्गाभ्यांविकल्पयति। उदात्तंवस्तुनः संपत्। संपत्समृद्धियोगः। यथा। मुक्ताः केलिविसूत्रहारगलिताः सं
मार्जनीभिर्हृताः प्रातः प्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाः। दूराद्दाडिमबीजशंकितधियःकर्षंतिकेली
शुकायाद्विद्वद्भवनेषुभोजनृपतेस्तत्त्यागलीलायितं। महतांचोपलक्षणं। उपलक्षणमंगभावः। अर्थादुपलक्ष

118

णीयेष्वेवोदाहरणं ॥ तद्यथा ॥ इदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ॥ निवसन् बाहुसहायश्चकार रक्षः क्षयं रामः ॥ न वा
न्वीरोरसः ॥ तस्येहं गत्वा ॥ तत्सिद्धिहेतावेकस्मिन् यत्रान्यं तत्करं भवेत् ॥ समुच्चयोसौ ॥ तस्मिन् प्रस्तुते तस्य कार्यस्यैकस्मि
न्साधके स्थिते साधकान्तरान्यत्र संभूतिस्स समुच्चयः ॥ उदा० ॥ दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोप्युत्सुकं गाढं प्रे
म नवं वयोतिकठिनाः प्राणाः कुलं निर्मलं ॥ स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतांतोक्षमो नो सख्यश्चतुराः कथं तु
विरहः सोढव्य इत्थं शठः ॥ अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वंति तदुपरि प्रियतमदूरस्थित्याद्युपात्तं ॥ एष एव समु
च्चयः ॥ सद्योगे असद्योगे सदसद्योगे च पर्यवस्यतीति न पृथग् लक्ष्यते ॥ तथाहि ॥ कुलममलिनं भद्रा मूर्तिर्मतिः श्रुति
शालिनी भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखंडितं ॥ प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं
राजंस्त एव तवांकुशाः ॥ अत्र सतां योगः उक्तोदाहरणे त्वसतां योगः ॥ शशी दिवसधूसरो गलितयौवना कामिनी सरो
विगतवारिजं मुखमनक्षरं स्वाकृतेः ॥ प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो नृपांगणगतः खलो मनसि सप्त शल्यानि
मे ॥ अत्र शशिनि धूसरे शल्ये शल्यांतराणीति शोभनाशोभनयोगः ॥ सत्वन्योन्यमुपधा गुणक्रियाः ॥ गुणौ च क्रि
ये च गुणक्रियाः ॥ क्रमेणोदा० ॥ विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ॥ प्रखलमुखानि नराधि
प मलिनानि च तानि जातानि ॥ क्रियेयथा ॥ अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ॥ नववारिधरोद

६०

वि

यादस्तोभिर्मे वितव्यं च निरातपत्ररम्यैः॥ कलुषं च तवाहितेष्वकस्मात्सितपंकेरुहसोदरश्रि चक्षुः। पतितं च महीपतीन्द्र ते
षां वपुषि प्रस्फुटमापदां कटाक्षैः॥ धुनोति चासिं तनुते च कीर्तिमित्यादेः कृपाणपाणिश्च भवान्रणक्षितौ॥ ससाधु
वादाश्च सुरासुरालयद्वृत्यादेश्च दर्शनाद्व्यधिकरणे इत्येकस्मिन्देश इति च न वाच्यं॥ एकं क्रमेणानेकस्मिन्पर्यायः॥
एकं वस्तु क्रमेणानेकस्मिन्भवति क्रियते वा यत्स पर्यायः। क्रमेणोदाहरणं॥ श्रोणीबंधस्त्यजति तनुतां सेवते मध्यभा
गः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां। धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं यद्गात्राणां गुणविनिमयः क
ल्पितो यौवनेन। नन्वाश्रयास्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा। प्रागर्णवस्य हृदये वृषलक्ष्मणोथ
कंठेधुना वससि वाचि पुनः खलानां॥ यथा वा॥ बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत। अधुना हृदयेप्येष मृगशावाक्षि ल
क्ष्यते॥ रागस्य वस्तुभेदेप्येकतया ध्यवसितत्वादेकत्वमरुद्धं। तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसं
बिंबाहरे पिआणं णिवेसिअं कुसुमबाणेण। अन्यस्ततोन्यथा। अनेकमेकस्मिन्क्रमेण भवति क्रियते वा यत्सोन्यः। क्रमेणो
दा०। मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति। अथ कथयति मोहहेतुरंतर्गतमिव हालाहलं विषं तदेव॥
तद्गेहं नतभित्ति मंदिरमिदं लब्धावकाशं दिवः सा धेनुर्जरती नदंति करिणामेता घनाभा घटाः। स क्षुद्रो मुशलध्वनिः क
लमिदं संगीतकं योषितामाश्चर्यं दिवसैर्द्विजोयमियतीं भूमिं समारोपितः॥ अत्रैकस्यैव वस्तुनोपादानयोरविवक्षितत्वात्प

५। तं तेषां श्रीसहोदररत्नाहरणे हृदयमेकरसं। बिंबाधरे प्रियाणां निवेशितं कुसुमबाणेन॥५

१=पक्षवृत्तित्वंसपक्षेसत्त्वंविपक्षव्यावृत्तिः।१

रिवृत्तिः।अनुमानंतदुक्तंयत्साध्यसाधनयोर्वचः।पक्षधर्मान्वयव्यतिरेकवत्त्वेनत्रिरूपोहेतुःसाधनं।धर्मिण्ययोगव्यवच्छेदो
व्यापकस्यसाध्यं।यथा।यत्रैतालहरीचलाचलदृशोव्यापारयंतिभ्रुवंतत्रैवप्रपतंतिसंततममीमर्मस्पृशोमार्गणाः।
तच्चाकृष्टकृतचापमंचितशरःप्रेंखत्करःक्रोधनोधावत्यग्रतएवशासनधरःसत्यंतदासांस्मरः॥साध्यसाधनयोःपौर्वापर्य
विकल्पनेवैचित्र्यंनकिंचिदितितथानदर्शितं॥विशेषणैर्यत्साकूतैरुक्तिःपरिकरस्तुसः॥अर्थाद्विशेष्यस्य॥उदा०॥महौज
सोमानधनाधनार्चिताधनुर्भृतःसंयतिलब्धकीर्तयः।नसंहतास्तस्यनभिन्नवृत्तयःप्रियाणिवांछंत्यसुभिःसमीहितुं॥यद्यप्य
पुष्टार्थस्यदोषताभिधानात्निराकरणेनपुष्टार्थस्यस्वीकारःकृतस्तथाप्येकनिष्ठत्वेनबहूनांविशेषणानामेवामुपन्यासेवै
चित्र्यमित्यलंकारमध्येगणितः॥व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनं।निगूढमपिवस्तुनोरूपंकथमपिप्रभिन्नंकेना
पिव्यपदेशेनयदपह्नूयतेसाव्याजोक्तिः।नचैषापह्नुतिःप्रकृताप्रकृतोभयनिष्ठस्यसाम्यस्येहासंभवात्।उदा०।शैलेंद्र
प्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमांचादिविसंस्थुलाखिलविधिव्यासंगभंगाकुलः।हाशैत्यंतुहिनाचलस्यकर
योरित्यूचिवान्सस्मितंशैलांतःपुरमातृमंडलगणैर्दृष्टोवताद्वःशिवः।अत्रपुलककंपथूसात्विकरूपतयाप्रसृतौशैत्य
कारणतयाप्रकाशितत्वादपलपितस्वरूपौव्याजोक्तिंप्रयोजयतः॥किंचित्पृष्टमपृष्टंवाकथितंयत्प्रकल्प्यते।तादृगन्य
व्यपोहायपरिसंख्यातुसास्मृता॥प्रमाणांतरावगतमपिवस्तुशब्देनप्रतिपादितंप्रयोजनांतराभावात्।सदृशवस्त्वंतर

व्यवच्छेदाययत्पर्यवस्यतिसाभवेत्परिसंख्या॥अत्रकथनंप्रश्नपूर्वकंतदन्यथाचपरिदृष्टं।तथोभयत्रव्यपोह्यमानस्यप्रतीयमान
तावाच्यत्वेचेतिचत्वारोस्यभेदाः॥क्रमेणोदा०किमासेव्यंपुंसांसविधमनवद्यंद्युसरितःकिमेकान्तेध्येयंचरणयुगलंकौस्तुभभृतः
किमाराध्यंपुण्यंकिमभिलषणीयंचकरुणायदासक्त्याचेतोनिरवधिविमुक्त्यैप्रभवति॥किंभूषणंसुदृढमत्रयशोनरत्नंकिंकार्य
मार्यचरितंसुकृतंनदोषः॥किंचक्षुरप्रतिहतंधिषणाननेत्रंजानातिकस्त्वदपरःसदसद्विवेकं॥कौटिल्यंकचनिचयेकरचरण
धरदलेषुरागस्ते।काठिन्यंकुचयुगलेतरलत्वंनयनयोर्वसति॥भक्तिर्भवेनविभवेव्यसनंशास्त्रेनयुवतिकामास्त्रे।चिंतायश
सिनवपुषिप्रायःपरिदृश्यतेमहतां॥यथोत्तरंचेत्पूर्वस्यपूर्वस्यार्थस्यहेतुता।तदाकारणमालास्यात्॥उत्तरमुत्तरंप्रतियथोत्त
रं।उदा०।जितेंद्रियत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवाप्यते।गुणप्रकर्षेणजनोनुरज्यतेजनानुरागप्रभवाहिसंपदः॥हेतु
मतासहहेतोरभिधानमभेदतोहेतुरितिहेत्वलंकारोनलक्षितः।आयुर्घृतमित्यादिरूपोह्येषनभूषणतांकदाचिद्वहतीतिवैचित्र्या
भावात्।अविरलकमलविकाशःसकलालिमदश्चकोकिलानंदः।रम्योयमेतिसंप्रतिलोकोत्कंठाकरःकालः॥इत्यत्रतुकाव्यरू
पतांकोमलानुप्रासमहिम्नैवसमाम्नासिषुर्नतुहेत्वलंकारकल्पनयेतिपूर्वोक्तंकाव्यलिंगमेवहेतुः॥क्रिययातुपरस्परंव
स्तुनोर्जननेन्योन्यं॥अर्थयोरेकक्रियामुखेनपरस्परंकारणत्वेसत्यन्योन्यानामालंकारः।उदा०।हंसाणंसरेहिसिरीसा
रिज्जइअहसराणंहंसेहिं।अण्णोण्णंचिअएएअप्पाणंणवरगरुअंति॥अत्रोभयेषामपिपरस्परंजनकतामिथःश्रीसारतासंपादन

२ = वानिज्जकहत्थिदंताकृतोस्माकं व्याघ्रकृत्तयः यावत् लुलितालकमुखी गृहे परिस्फुरति स्नुषा ॥ २ ६ = का विषमा दैवगतिः किं लब्धं यज्जनो गुणग्राही । किं सौख्यं सुकलत्रं किं दुर्ग्राह्यं खलो लोकः ॥

द्वारेण । उत्तरश्रुतिमात्रतः प्रश्नस्योन्नयनं यत्र क्रियेत तत्र वासति । असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरं ॥ प्रतिवचनोपलंभादेव पू
र्ववाक्यं यत्र परिकल्प्यते तदेकं तावदुत्तरं उदा० वाणिज्जअ हत्थिदंता कत्तो अम्हाण वग्घकित्तीअ । जाव लुलिआलअमुही घरं
म्मि परिसक्कए सुह्ला । हस्तिदंताव्या■घ्रकृत्तीनामस्मदर्थी मूल्येन ताः प्रयच्छेति कृतवचनमनुना वाक्येन समुन्नीयते तेन चेत
त्कोव्यलिंगमुत्तरस्य तादृप्यानुपपत्तेः । न हि प्रश्नस्य प्रतिवचनं जनको हेतुर्न्ना■पीदमनुमानमेकधर्मिनिष्ठतया साध्यसा
धनयोरनिर्देशादित्यलिंगांतरमेवोत्तरं साधीयः । प्रश्नादनंतरं लोकातिक्रांतगोचरतया पदसंभाव्यरूपं प्रतिवचनं स्यात्तद
परमुत्तरं । अनयोः सकृदुपादानान्न चारुताप्रतीतिरित्यसकृदित्युक्तं उदा० का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही
किं सोक्खं सुकलत्तं किं दुग्गज्झं खलो लोओ । प्रश्नपरिसंख्यायामन्यव्यपोह एव तात्पर्यमिह तु वाच्य एव विश्रांतिरित्यनयो
विवेकः । कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्य प्रकाश्यते । धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्ष्यते । कुतोपि केप्याकारादिंगि
ताद्वा ॥ सूक्ष्मः स तीक्ष्णमतिसंवेद्यः । उदा० वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे । पुंस्त्वे तन्व्या व्यंजयंतीव
यस्या स्मित्वा पाणौ खड्गलेखां लिलेख । अत्राकृतिमालोक्य कयापि वितर्कितं पुरुषायितमसिलतालेखनेन वैदग्ध्यादभिव्य
क्तिमुपनीतं पुंसामेव कृपाणस्य पाणियोग्यत्वात् । यथा वा । संकेतकालमनसं विटं ज्ञात्वा विदग्धया । स■न्नेत्रार्पिताकूतं लीला
पद्मं निमीलितं । अत्र जिज्ञासितः संकेतकालः कयाचिदिंगितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया

ह
६२

यस्यैव व्रणस्तस्या वेदना भणति तज्जनो अलीकं। दंतक्षतं कपोले वध्वा वेदना सपत्न्याः॥

प्रतिपादितः॥ उत्तरोत्तरमुत्कर्षो भवेत्सारः पराबधिः। परः पर्यंतभागोवधिर्यस्य धाराधिरोहितत्तया तत्रैवोत्कर्षस्य विश्रांतेः। उदा०
राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधं। सौधे तल्पं तल्पे वरांगनानंगसर्वस्वं॥ भिन्नदेशतयात्यंतं कार्यकारणभूतयोः। युगपद्
धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः। इह यद्देशं कारणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टं यथा धूमादि। यत्र हेतुफलभूतयोरपि धर्मयोः
केनाप्यतिशयेन नानादेशतया युगपदवभासनं मातयोः स्वभावोत्पन्नपरस्परसंगतित्यागादसंगतिः। उदा०। जस्स च्चिअ वणो तस्स च्चिअ वेअणा
भणइ तं जणो अलिअम्। दंतक्खअं कवोले वहूए वेअणा सवत्तीए॥ एषा विरोधबाधिनी न विरोधः। भिन्नाधारतयैव द्वयोरिह विरो
धितायाः प्रतिभासात्। स विरोधे तु विरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्यवसितमपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः। तथा चे
वनदर्शितं। समाधिः सुकरं कार्यं कारणांतरयोगतः। साधनांतरोपकृतेन कर्त्रा यदक्लेशेन कार्यमारब्धमाधीयते स समाधिर्नाम॥
उदा०। मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं॥ समं योग्यतया योगो यदि संभावितः क्वचित्। इद
मनयोः श्लाघ्यमिति योग्यतया संबंधस्य नियतविषयमध्यवसानं चेत्तदा समं। उदा०। धातुः शिल्पातिशयनिकषस्थानमेषा मृगा
क्षी रूपे देवोप्ययमनुपमो दत्तपत्रः स्मरस्य। जातं दैवात्सदृशमनयोः संगतं यत्तदेतच्छृंगारस्योपनतमधुना राज्यमेकातपत्रं॥ यथा वा
चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितरचनासंविधाता विधाता। यन्निंबानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥ क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्। कर्तुः क्रियाफलावाप्तिर्नैवान
र्थश्च यद्भवेत्। गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये। क्रमेण च विरुद्धे यत्स एव विषमो मतः॥ द्वयोरत्यंतविलक्षणतया यद्

नुपपद्यमानतयैव योगः प्रतीयते। यच्च किंचिदारंभमाणः कर्त्ता क्रियायाः प्रणाशान्न केवलमभीष्टं तत्फलं न लभेत यावदप्रार्थि
तमप्यनर्थं विषममासादयेत्। तथा सत्यपि कार्यस्य कारणरूपानुकारे यत्र ययोर्गुणौ क्रिये च परस्परविरुद्धतां व्रजतः स समवि
पर्ययात्मा च तद्रूपो विषमः॥ क्रमेणोदा०॥ शिरीषादपि मृद्वङ्गी केयमायतलोचना। अयं क्व च कुकूलाग्निः कर्कशो मदनान
लः॥ सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः। जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥ सद्यः करस्पर्शमवाप्य चित्रं रणे यस्य
कृपाणलेखा। तमालनीला शरदिंदुपांडु यशस्त्रिलोकाभरणं प्रसूते॥ आनंदममंदमिमं कुवलयदललोचने ददासि त्वं॥ वि
रहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥ अत्रानंददानं शरीरतापेन विरुध्यते। एवं विपुलेन सागरशयस्य कुक्षिणा भुवनानि य
स्य पपिरे युगक्षये। मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा॥ त्याद्योपि विषमत्वं यथायोगमनुगंतव्यं॥
महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात्। आश्रयाश्रयिणोः स्यातां तनुत्वेप्यधिकं तु तत्॥ आश्रितमाधेयं। आश्रयस्तु
तदाधारस्तयोर्महतोरपि विवक्षितयोस्तदपेक्षया। तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यदधिकतां व्र
जतस्तदिदं द्विविधमधिकं नाम॥ क्रमेणोदा०॥ अहो विशालं भूपाल भुवनत्रितयोदरम्। माति मातुमशक्योपि यशोराशिर्यदत्र
ते॥ युगांतकालप्रतिसंहृतात्मनो जगंति यस्यां सविकाशमासत। तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः॥
प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया। या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥ न्यक्कृतिं परमपि विपक्षं साक्षान्निरसितुमस
हेन केनापि यत्नमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं तदनीकप्रतिनिधितुल्यत्वात्प्रत्यनीकमभिधीयते॥ यथा॥ ६२

अनीकेभियोज्येतत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते तथेदृशप्रतियोगिनि विजयेत दीयोन्यो विजीयत इत्यर्थः। ७८।
त्वं विनिर्जितमनोभवरूपः सा च सुंदर भवत्यनुरक्ता। पंचभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः। यथा वा। यस्य किंचि
दपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः। कांतवक्त्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बाधते॥ इंदोरत्र तदीयतासंबंधिसं
बंधात्॥ समेन लक्षणा वस्तु वस्तुना यन्निगूह्यते। निजेनागंतुना वापि तन्मीलितमिति स्मृतं। सहजमागंतुकं वा किमपि
साधारणेन यल्लक्षणेन तद्द्वारेण किंचित्केनचिदिस्यद्वस्तु स्थितेनैव बलीयस्तया तिरोधीयते तन्मीलितमिति द्विधा स्मृतं।
क्रमेणोदा०। अपांगतरलदृशो मधुरवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखं। इति स्फुरितमंगके मृगदृशां स्व
तो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते। अत्र दृक्तरलतादिकमंगस्यालिंगस्वाभाविकं। साधारणं च मदोदयेनात
त्रापि तस्य दर्शनात्॥ ये कंदरासु निवसंति सदा हिमाद्रेस्त्वत्पातशंकितधियो विवशा द्विषस्ते। अप्यंगमुत्पुलकमुद्वहतां स
कंपं तेषामहो वत भियां न बुधोप्यभिज्ञः। अत्र तु सामर्थ्यावसितस्य शैत्यस्यागंतुकतया तत्त्वभयोरपि कंपपुलकयोस्ताद्रू
प्यसमानतया च भयेष्वपि तयोरुपलक्षितत्वात्। स्थाप्यते पोह्यते वापि यथापूर्वं परंपरं। विशेषणतया यत्र वस्तु सैकावली द्वि
धा। पूर्वं पूर्वं प्रति यत्रोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन स्थापनं निषेधो वा संभवति सा द्विधा बुधैरेकावली भण्यते। क्र
मेणोदा०। पुराणि यस्यां सवरांगनानि वरांगना रूपपुरस्कृतांग्यः। रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य।

नतज्जलयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदं।नषट्पदोसौकलकूजितोनयोगुंजितंतन्नजहारयन्मनः॥एवंत्रि
पुराणांवरांगनास्तासामंगविशेषणमुखेनरूपंतस्यविलासास्तेषमप्यसत्त्वमित्यमुनाक्रमेणविशेषणंविधीयते।उत्तरत्रनि
षिध्येवंयोयं॥यथानुभवमर्थस्यदृष्टेतत्सदृशेस्मृतिः।स्मरणं।यःपदार्थःकेनचिदाकारेणनियतोयदाकदाचिदनुभूतो
सकालांतरेस्मृतिप्रतिबोधायिनि।तत्समानेवस्तुनिदृष्टसतियत्तथैवस्मर्यतेतद्भवेत्स्मरणं।उदा०।निम्ननाभिकुहरेषुयदंभः
प्लावितंचलदृशांलहरीभिः।तद्भवैःकुहरुतैःसुरनार्यःस्मारितासुरतकंठरुतानां॥यथावा।करजुअगहिअजसोआयण
मुहविणिवेसिआहरउडस्स।संभरिअपंचजण्णस्सणमहकहस्सरोमंचं।भ्रांतिमानन्यसंवित्तत्तुल्यदर्शने॥तदित्यन्यदप्रा
करणिकंनिर्दिश्यतेतेनसमानमर्थादिदप्राकरणिकमाश्रीयतेतस्यतथाविधस्यदृष्टेसत्यांयदप्राकरणिकतयासंवेदनं
सभ्रांतिमान्नचेयंरूपकं।प्रथमावातिशयोक्तिस्तत्रवस्तुनोभ्रमस्याभावात्।इहचार्थानुगमनेनसंज्ञायाःप्रवृत्तोसत्यस्यप्रवृ
मेवप्रतिपन्नत्वात्।उदा०।कपालेमार्जारःपयइतिकरान्लेढिशशिनस्तरुच्छिद्रप्रोतान्बिसमितिकरीसंकलयति।रतांते
तल्पस्थान्हरतिवनितापंशुकमितिप्रभामत्तश्चंद्रोजगदिदमहोविप्लवयति।आक्षेपमुपमानस्यप्रतीपमुपमेयता।तस्यैव
यदिवाकल्प्यातिरस्कारनिबंधनं।अस्यधुरंवोढुमुत्तरामुपमेयमेवप्रौढमितिकेमर्थकेनयदुपमानमाक्षिप्यते।यदपितस्यै
वोपमानतयाप्रसिद्धस्योपमानांतरविवक्षयानादरार्थमुपमेयभावःकल्प्यते।तदुपमेयस्योपमानंप्रतिप्रतिकूलवर्तित्वा

दुभयरूपं प्रतीपं । क्रमेणोदा० । लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ॥
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ एए हिदावसुंदलिकणस
ऊणं सुणसु वअ्रणिज्जं । तज्जमुहेण किंसा अस्सिं चंदोउवमिज्जइ जणेणा ॥ अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वादुप
मित्यनिष्पत्त्या वअ्रणिज्जमिति वचनीयपदाभिव्यंग्यतया तिरस्कारः । क्वचित्तु निष्पन्नेवोपमितिक्रियानादरं निबंधनं । यथा ॥ ग
र्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे । संतीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि ॥ इहोपमेयीकरणमेवो
त्पलानामनादरः । अनयैव रीत्या पदसामान्यगुणयोगान्नोपमानभावमप्यननुभूतपूर्वं तस्य तत्कल्पनायामपि भवति प्रतीप
मिति प्रत्येतव्यं । यथा । अहमेव गुरुः सुदारुणानामिति हालाहल तात मास्म दृप्यः । ननु संति भवादृशानि भूयो भुवनेस्मिन् व
चनानि दुर्जनानां ॥ अत्र हालाहलस्योपमानत्वमसंभाव्यमेवोपनिबद्धं । प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया । ऐकात्म्यं
वध्यते योगात्तत्सामान्यमिति स्मृतं ॥ अतादृशमपि तादृशतया विवक्षितं यदप्रस्तुतपदार्थेन संपृक्तमपरित्यक्तनिजगुणमे
वतदेकात्मतया निबध्यते तत्समानगुणसंबंधात्सामान्यं । उदा० मलयजरसविलिप्ततनवो नवहारलताविभूषिताः । शि
ततरदंतपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ॥ शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः । प्रियवसतिं प्र
याति सुखमेव निरस्तभियोभिसारिकाः ॥ अत्र प्रस्तुततदन्ययोरन्यूनातिरिक्ततया निबंधबलत्वमेकात्मताहेतुः । अत

128

एवंपृथग्भावेननानयोरुपलक्षणं।।यथावाविचित्रत्वचातुल्यरुचावधूनांकर्णाग्रतोगंडतलागतानि।भृंगाःसहेलंयदिना
पतिष्यन्कोवेदयिष्यन्नवचंपकानि।।अत्रनिमित्तांतरजनितापिनानात्वप्रतीतिःप्रथमप्रतिपन्नमभेदंनव्युदसितुमु
त्सहते।प्रतीतत्वात्तस्यप्रतीतेःस्वकार्ययोगात्।।विनाप्रसिद्धमाधारमाधेयस्यव्यवस्थितिः।एकात्मायुगपद्वृत्तिरेकस्या
नेकगोचरा।अन्यत्प्रकुर्वतःकार्यमशक्यस्यान्यवस्तुनः।तथैवकरणंचेतिविशेषस्त्रिविधःस्मृतः।प्रसिद्धाधारपरिहारेण
यदाधेयस्याविशिष्टास्थितिरभिधीयते।सप्रथमोविशेषः।उदा०।दिवमप्युपयातानामाकल्पमनल्पगुणगणायेषां।रमय
तिजगंतिगिरःकथमिवकवयोनतेवंद्याः।एकमपिवस्तुयदेकेनैवस्वभावेनयुगपदनेकत्रवर्ततेसद्वितीयः।उदा०।सावसइ
तुज्झहिअएसच्चिअअच्छीसुसाअवअणेसु।अम्हारिसाणसुंदरओआसंनत्थिपावाणं।यदपिचकिंचिद्रभसेनारभ
माणस्तेनैवयत्नेनाशक्यमपिकार्यांतरमारभते।सोप्यपरोविशेषः।उ०।स्फुरदद्भुतरूपमुत्प्रतापज्वलनंत्वांसृजतानवद्यवि
द्यं।विधिनाससृजेनवोमनोभूर्भुविसत्यंसविताबृहस्पतिश्च।यथावा।गृहिणीसचिवःसखीमिथःप्रियशिष्याललितेकलावि
धौ।करुणाविमुखेनमृत्युनाहरतात्वांवदकिंनमेहृतं।सर्वत्रचैवंविधेविषयेतिशयोक्तिरेवप्राणत्वेनावतिष्ठते।तांविनाप्रायेणालंकारो
नयाविनेति।स्वमुत्सृज्यगुणंयोगादत्युज्ज्वलगुणस्ययत्।वस्तुतद्गुणतामेतिभण्यतेसतुतद्गुणः।वस्तुतिरस्कृतनिजरूपंकेनापि
समीपगतेनप्रगुणतयास्वगुणसंपदोपरक्तंतत्प्रतिभासमेवयत्समासादयतिसतद्गुणः।तस्याप्रकृतस्यगुणोत्रास्तीति।।उदा०

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या। रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥ अत्र रवितुरगापे
क्षया॥ गरुडाग्रजस्य तदपेक्षया हरिन्मणीनां प्रगुणत्ववर्णनात्॥ न ह्यपानं नुदतश्चेदस्य तत्स्यादतद्गुणः। यदि तु तदीयवर्णसंभव
स्यामपि योग्यतायामिदं न्यूनगुणं न गृह्णीयात्तदाभवेदतद्गुणो नाम। उदा० धवलोसि जइ वि सुंदर तह वि तुए मज्झ रंजिअं हिअ
अं। राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि। अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपागत इत्यतद्गुणः॥ किं
चातदित्यप्रकृतस्येति च प्रकृतमत्र निर्दिश्यते इति न यदप्रकृतस्य रूपं प्रकृतेन रक्ततामुपागत उच्यतद्गुणः॥ किंवातदित्यप्रकृतमस्ये
ति च प्रकृतमत्र निर्दिश्यते इति न यदप्रकृतस्य रूपं प्रकृतेन कुतोपि निमित्तान्नानुविधीयते सोतद्गुण इत्यपि ज्ञातिपत्तव्यं। यथा गं
गमंगासित्तमंबुयामुनं कज्जलाभमुभयत्र मज्जतः। राजहंस तव सैव शुभ्रता चीयते न च न वापचीयते॥ यद्यथा साधितं केनाप्यपरे
ण तदन्यथा। तथैव यद्विधीयेत स व्याघात इति स्मृतः॥ येनोपायेन यदेकेनोपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्य
थाकरणं समाधितवस्तुव्याहतिहेतुत्वाद्व्याघातः। उदा० दृशा दग्धं मनसिजं जीवयंति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वाम
लोचनाः॥ सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः॥ एतेषां समनंतरमेवोक्तस्वरूपाणामलंकाराणां यथासंभवमन्योन्यनिरपेक्ष
तया यदिह शब्दभाग एवार्थविषय एवोभयत्र वावस्थानं सैकार्थसमवायस्वभावा संसृष्टिः। तत्र शब्दालंकारसंसृष्टिः। कुसु
मसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया। चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया॥ अर्थालंकार

संसृष्टिः॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता॥ पूर्वत्र परस्परनिरपेक्षो यमकानुप्रासो संसृष्टिं प्रयोजयतः। उत्तरत्र तु यथाविधमुपमोत्प्रेक्षे शब्दार्थालंकारयोस्तु संसृष्टिः॥ सो णत्थि एत्थ गामे जो एअं महमहंतलावण्णं। तरुणाण हिअअलूडिं परिसक्कंतिं णिवारेइ॥ अत्रानुप्रासो रूपकं वान्योन्यानपेक्षकौ संसर्गश्चानयोरेकत्र वाक्ये छंदसि वा समवेतत्वात्। अविश्रांतिजुषामात्मन्यंगांगित्वं तु संकरः॥ एते एव यत्रात्मन्यनासादितस्वतंत्रभावः परस्परमनुग्राह्यानुग्राहकतां दधति स एषां संकीर्यमाणस्वरूपत्वात्संकरः॥ आत्तो सीमंतरत्ने मरकतिनि हृते हेमताटंकपत्रे लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते। शोणं बिंबोष्ठकांत्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन् गुंजाफलानां स्रज इति शबरा नैव हारं हरंति॥ अत्र तद्गुणमपेक्ष्य भ्रांतिमता प्रादुर्भूतं तदाश्रयेण च तद्गुणः। सचेतसां च मत्कृतिनिमित्तमनयोरंगांगिभावः। यथा। जटाभिर्भाभिः करधृतकलंकाक्षवलयो वियोगिव्यापत्तेरिव कलितवैराग्यविभवः। परिभ्रंश्यत्तारापरिकरकपालांकिततले शशी भस्मापांडुः पितृवन इव व्योम्नि चरति॥ उपमारूपकमुत्प्रेक्षाश्लेषश्चेति चत्वारोत्र सर्वे वृंदं गता यान्न प्रतीयते। कलंक एवाक्षवलयमिति च रूपकपरिग्रहे कररूपतत्त्वमेव साधकं प्रमाणतां प्रतिपद्यते। अस्य हि रूपकत्वेन प्रतिपादितकलंकरूपमक्षवलयमेव मुख्यतयावगम्यते। तस्यैव च करग्रहणयोग्यतया सार्वत्रिकी प्रसिद्धिः। श्लेषच्छायया तु कलंकस्य करधारणमसदेव प्रत्यासत्त्योपचर्य योज्यते। शशांकेन कलंकस्य च मूर्त्यैवोद्वहनात्। कलंकाक्षवलयेति तूपमायां कलंकस्योत्कटतया प्रति

६६

पतिर्नृचास्य करध्वत त्वं तत्त्वतोस्तीति मुख्येष्वुपचार एव शरणं स्यात्। एवं रूपश्च संकरः शब्दालंकारयोरपि दृश्यते। यथा॥
राजति तटीयमभिहतदानवरासातियातिसारावनदा। गजता व यूथमविरतदानवरासातियातिसारावनदा। अत्र यमक
मनुलोमप्रतिलोमं च चित्रभेदः। पादद्वयगते परस्परापेक्षे। एकस्य च ग्रहन्यायदोषाभावादनिश्चयः। द्वयोर्बहूनां वा
लंकाराणामेकत्र समावेशेपि विरोधात्। यत्र युगपदेवस्थानं न वैकतरस्य परिग्रहे साधकं न दितरस्य वा परिहारे बाधकम
स्ति येनैकतर एव समपरिगृह्येत स निश्चयाभावरूपो द्वितीयः संकरः। समुच्चयेन संकरस्यैवाक्षेपात्। उदा०। जह गहीरो
जह रअणणिब्भरो जह अ णिम्मलच्छाओ। ता किं विहिणा एसो सरसवाणिउ जलणिही ण कओ॥ अत्र समुद्रे प्रस्तुते वि
शेषणसाम्यादप्रस्तुतार्थप्रतीतेः किं समासोक्तिः किमब्धेरप्रस्तुतमुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य
प्रतीतेरियमप्रस्तुतप्रशंसेति संदेहः। यथा वा। नयनानंददायींदोर्बिंबमेतत्प्रसीदति। अधुनापि निरुद्धाशमविशीर्ण
मिदं तमः। अत्र किं कामस्योद्दीपकः कालो वर्तत इति भंग्यंतरेणाभिधानात्पर्यायोक्तिमुत वदनस्येंदुबिंबतयाध्य
वसानादतिशयोक्तिः। किं चैतदिति वक्त्रं निर्दिश्यते तद्रूपारोपवशाद्रूपकमथैतयोः समुच्चयविवक्षायां दीपकमथवास्तु
तुल्ययोगिता। किंतु प्रदोषसमये विशेषणसाम्यादेतन्न स्यादुगतौ समासोक्तिरहोस्विन्मुखनैर्मल्यप्रस्तावाद
प्रस्तुतप्रशंसेति बहूनां संदेहादयमेव संकरः। अत्र तु न्यायदोषयोरन्यतरस्यावतारस्तत्रैकतरस्य निश्चयान्न संशयः।

न्यायस्य साधकत्वमनुकूलत्वाद्दोषोऽपि बाधकत्वं प्रतिकूलता। तत्र सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिरि
त्यत्र मुख्यतयावगम्यमाना हसितद्युतिर्वक्त्र एवानुकूल्यं भजत इत्युपमायाः साधकं। शशिनि तु न तथा प्रतिकूलेति
न रूपकं प्रति तस्या बाधकता। वक्त्रेंदौ तव सत्ययं यदपरः शीतांशुरभ्युद्गत इत्यत्रापरत्वमिंदोरनुगुणं न तु वक्त्रस्य प्रतिकू
लमिति रूपकस्य साधकतां प्रतिपद्यते। न तूपमाया बाधकतां। राजन्नारायणं लक्ष्मीस्त्वामालिंगति निर्भरमित्यत्र पुनरालिंगने
नोपमां निरस्यति। सदृशं प्रति प्रेयसीप्रयुक्तस्यालिंगनस्यासंभवात्। पादांबुजं भवतु वो विजयाय मंजुमंजीरशिंजितमनोहर
मंबिकाया इत्यत्र च मंजीरशिंजितमंबुजे प्रतिकूलमसंभवादिति रूपकस्य बाधकं। ननु पादे त्वनुकूलमित्युपमायाः साधकम
भिधीयते। विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कृष्टत्वेन प्रतिपत्तेः। एवमन्यत्रापि सुधीभिः परीक्ष्यतां। स्फुटमेकत्र विष
ये शब्दार्थालंकृतिद्वयं। व्यवस्थितं च। अभिन्ने एव पदे स्पष्टतया यदुभावपि शब्दार्थालंकारौ व्यवस्थ्या समासादयतः
सोऽप्यपरः संकरः। उदा॰ स्पष्टोल्लसत्किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथो दिवसारविंदं। श्लिष्टाष्टदिग्दलकलापमुखा
वतारबद्धांधकारमधुपावलि संचुकोच। अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ। तेनासौ त्रिरूपः परिकीर्तितः। तदयमनु
ग्राह्यानुग्राहकतया संदेहेनैकपदप्रतिपाद्यतया व्यवस्थितत्वात् त्रिप्रकारतयैव संकरो व्याकृतः। प्रकारांतरेण तु शक्यो
व्याकर्तुमानंत्यात्तत्प्रभेदभेदानां। इति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलंकाराः। कुतः पुनरेष प्रतिनि

यमोयदेतेषांतुल्येपिकाव्यशोभातिशायहेतुत्वेकश्चिदलंकारः।शब्दस्यकश्चिदर्थस्यकश्चिच्चोभयस्येतिचेदुक्तमत्र।यथा।।
काव्येतेषगुणालंकाराणांशब्दार्थोभयगतत्वेनव्यवस्थायामन्वयव्यतिरेकावेवप्रभवतोनिमित्तांतरस्याभावात्।तत
श्चयोलंकारोयदीयौभावाभावावनुविधत्तेसतदलंकारोव्यवस्थाप्यतइति।एवंचयथापुनरुक्तवदाभासः।परंपरिरूपकं
चोभयोर्भावाभावानुविधायितयोभयालंकारौ।तथाहि।शब्दहेतुकार्थांतरन्यासप्रभृतयोपिद्रष्टव्याः।अर्थस्यतुतत्रवैचि
त्र्यमुत्कटंतयाप्रतिभासतइतिवाच्यालंकृतिमध्येवस्तुस्थितिमनपेक्ष्यैवलक्षिताः।योलंकारोयदाश्रितःसतदलंकारइत्य
पिकल्पनायामन्वयव्यतिरेकावेवसमाश्रयितव्यौतदाश्रयणमंतरेणविशिष्टाश्रयाश्रयिभावस्याभावादित्यलंकाराणां
यथोक्तनिमित्तएवपरस्परव्यतिरेकोज्यायान्।।एषांदोषायथायोगंसंभवंतोपिकेचन।उत्कर्षतःपतंतीतिनपृथक्प्रतिपादि
ताः।यथाह्यनुप्रासस्यप्रसिद्ध्यभावोवैफल्यंवृत्तिविरोधइतियेत्रयोनर्थास्तेप्रसिद्धिविरुद्धतामपुष्टार्थत्वंप्रतिकूलवर्णतां
यथाक्रमंनातिक्रामंतितत्स्वभावत्वात्।क्रमेणोदा०।चक्रीचक्रारपंक्तिंहरिरपिचहरीन्धूर्जटिर्धूर्ध्वजांतानक्षंनक्षत्र
नाथोरुणमपिवरुणःकूबराग्रंकुबेरःरंहःसंघःसुराणांजगदुपकृतयेनित्ययुक्तस्ययस्यस्तौतिप्रीतिप्रसन्नोन्वहमहिमरु
चेःसोवतात्स्यंदनोवः।अत्रनेकर्तृकर्मप्रतिनियमेनस्तुतिरनुप्रासानुरोधेनैवप्रतिपादितानपुराणेतिहासादिषुतथाप्रतीते
तिप्रसिद्धिविरोधः।भणतरुणिरमरमंदिरमानंदस्यंदिसुंदरेंदुमुखि।यदिसल्लीलोल्लापिनिगच्छसितत्किंत्वदीयंमे।अत्रनणु

रणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्। परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ अत्र वाक्यस्य विविच्यमानं न
किंचिदपि चारुत्वं प्रतीयते इत्यपरिपुष्टार्थत्वेनानुप्रासस्य वैफल्यम्। अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि मां। कम्बुकण्ठ्याः क्षणं
कण्ठे कुरु कण्ठार्तिमुद्धर॥ शृङ्गारे परुषवर्णानाडम्बरं पूर्वोक्तया रीत्या विरुध्यत इति परुषानुप्रासे। अत्र प्रतिकूलवर्णनाख्यत्वि
रोधः। यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तं दोषः। यथा। भुजंगमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भा। दुरन्तता
निर्नयतोऽपि जनतोत्कर्षति चेतः प्रमुखे सदम्भाः। उपमायामुपमानस्य जातिप्रमाणगतं न्यूनत्वमधिकत्वं वा तादृश्यरुचिरार्थत्वं दो
षः। धर्मास्त्वेते तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं न भिचरतः। क्रमेणोदा०। चण्डालैरिव युष्माभिः साहसं परम
कृतम्। वह्निस्फुलिङ्ग इव भानुरयं चकास्ति। अयं पद्मासनासीनश्चक्रवाको विराजते। युगादौ भगवान्वेधा विनिर्मित्सुरिव
प्रजाः। पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ। वेणीदण्डः पुनरयं कालिंदीपातसंनिभः। अत्र चण्डालादिभिरुपमानैः प्रस्तु
तोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता। स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन्। व्यराजन्नीलजीमूतभागश्लिष्ट
इवांशुमान्। अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम्। स पीतवासाः प्र
गृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः। शातह्रदैरिन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः। अत्रोपमेयस्य शंखा
देरनिर्देशे शशिनो ग्रहणमतिरिच्यत इत्यधिकपदत्वम्। लिङ्गवचनभेदोऽप्युपमानोपमेययोः साधारणश्चेद्धर्ममन्यरूपं कु

यत्रैकतरस्यैव तद्धर्मसमन्वयावगतेः अविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेनापि धर्मेण प्रतीयत इति प्रक्रो
तस्यार्थस्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वं। यथा॥ चिंतारत्नमिव च्युतोसि करतो धिग्मंदभाग्यस्य मे शाकं वो भक्षिता देव
शुद्धाः कुलवधूरिव॥ यत्र तु नानात्वे लिंगवचसोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते न तत्रैतद्दूषणावतारः। उभययोप्य
स्यानुगमक्षमस्वभावत्वात्। यथा॥ गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः। तद्वेषोसदृशोन्याभिः स्त्रीभिर्मधुरताभृतः॥ द
धते स्म परां शोभां तदीया विभ्रमा इवेति। कालपुरुषविदग्ध्यादिभेदेपि न तथा प्रतीतिरस्खलितया विश्रांतिमासादयती
त्यसावपि भग्नप्रक्रमतयैव व्याप्तः। अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती। पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना॥
अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः। अत्यर्थमत्र जनविशेषविविक्तमूर्तिः कौसुंभरागरुचिरस्फुरदंशुकांता।
विभ्राजसे मकरकेतनमर्चयंती बालप्रवालविटपप्रभवा लतेव॥ अत्र लता विभ्राजते न तु विभ्राजसे इति संबोध्यमाननिष्ठस्य
परभागस्यासंबोध्यमानविषयतया व्यत्यासात्पुरुषभेदः। गंगेव प्रवहत्तु ते सदैव कीर्तिरित्यादौ च गंगा प्रवहति न तु प्रवह
त्वित्यस्याः प्रवृत्तप्रवर्तनात्मनो विधेरेवंजातीयस्य वान्यस्यार्थस्योपमानगतस्यासंभवद्विध्यादिभेदः। ननु समानमुच्चरितं
प्रतीयमानं वा धर्मांतरमुपादाय पर्यवसितायामुपमायामुपमेयस्य प्रकृतधर्माभिसंबंधान्न कश्चित्कालादिभेदोस्ति। यत्रा
प्युपांतो नैव सामान्यधर्मलोपमा। अत्र वाग्म्यते। युधिष्ठिर इवायं सत्यं वदतीत्यत्र युधिष्ठिर इव सत्यवादी अयं सत्यं वद
तीति प्रतिपत्स्यामहे। सत्यवादी सत्यं वदतीति न च पौनरुक्त्यमाशंकनीयं रैयिपोषं पुष्णातीतिवद्युधिष्ठिरस्य सत्यवचनेन सत्यवा

द्ययभियमित्यर्थोपगमात्सत्यमेतत्किन्तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यं प्रस्तुतवस्तुप्रतीतिविघातादिति
सचेतस एव तत्र प्रमाणं। अस्मादस्यासंभवाद्युपमायामनुचितार्थतायामेव पर्यवस्यतः। यथा। ग्रथ्नामि काव्यशशिनं विततार्थरश्मिं। अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वं॥ निःपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः। जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात्॥ अत्रापि ज्वलंत्यो बुधाराः सूर्यमंडलान्निःपतंत्यो न संभवंतीत्युपनिबध्यमानोऽर्थो नौचित्यमेव पुष्णाति। उत्प्रेक्षायामपि संभावने ध्रुवेदादय एव शब्दा वक्तुमुत्सहंते। न यथाशब्दोपि केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात्तस्य वास्याम विवक्षितत्वात्तत्राशक्तिरस्यावारकत्वं दोषः। यथा। उद्ययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलं। नारीलोचनचातुर्यशंकासंकुचितं यथा॥ उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वान्निरूपाख्यप्रख्यं तत्समर्थनायदर्थांतरन्यासस्योपादानं। तदोलख्यामिव गगनतलेऽत्यंतमसमीचीनमिति विषयत्वमेतस्यानुचितार्थत्वेव दोषः। यथा। दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारं। क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव॥ अत्राचेतनस्य तमसो दिवाकरात्त्रास एव न संभवति। कुत एव तत्त्रयोजितमद्रिणा परित्राणं। संभावितेनानुरूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिखतरतीति व्यर्थ एव तत्समर्थनायां यत्तः साधारणविशेषणवशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशय

६९

नीतितस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयतायत्तु दृष्टार्थत्वं पुनरुक्तता वा दोषः।यथा।स्पृशति तिग्मरुचेः ककुभः करैर्दयि
तयेव विजृंभिततापया।अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि दिनश्रिया।अत्र तिग्मरुचेः ककुभश्च यथासदृशाविशेष
णवशेन व्यक्तिविशेषपरिग्रहेण च नायिकतया नायिकात्तया च व्यक्तिस्तथा ग्रीष्मदिवसश्रियोपि प्रतिनायिकात्वेन भानं
भविष्यतीति किं दयितेति स्वशब्दोपादानेन।श्लेषोपमायान्तु सविषयोपत्त्रोपमानस्योपादानमंतरेण साधारणे पि वि
शेषणेषु न तथा प्रतीतिर्यथा।स्वयंच पल्लवाताम्रभास्वत्करविराजिनी।प्रभातसंध्येवास्वापफललुब्धेहितप्रदेति।अ
प्रस्तुतप्रशंसायामप्युपमेयमनयैव नीत्या प्रतीतं पुनःप्रयोगेन कदर्थ्यतेयं।यथा।आहूतेषु विहंगमेषु मशको नाया
न्पुरो वार्यते मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां रुचं।खद्योतोपि न कंपते प्रचलितुं मध्येपि तेजस्विनां धिक्सा
मान्यमचेतनं प्रभुमिवानामृष्टतत्वांतरं॥अत्राचेतनः प्रभोरस्तुत विशिष्टसामान्यद्वारेणाभिव्यक्तेर्युक्तो नैव पुनःक
थनं तदेतेलंकारदोषा यथासंभविनोन्येप्येवंजातीयकाः पूर्वोक्तैर्येव दोषजात्या अंतर्भाविता न पृथक्प्रतिपादनमर्हंति
इति संपूर्णमिदं काव्यलक्षणं॥ इति काव्यप्रकाशेऽर्थालंकारनिर्णयो नाम दशम उल्लासः॥ ॥श्रीरस्तु॥
निधिनिक्षेपस्थानस्योपरि चिन्हार्थमिव लता विहिता॥ लोभयति तव तन्वि दरिजघनतटादुपरि रोमाली॥१॥

138

[OrderDescription]
,CREATED=25.08.20 15:25
,TRANSFERRED=2020/08/25 at 15:47:04
,PAGES=138
,TYPE=STD
,NAME=S0003549
,Book Name=M-1176-KAVYAPRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,